दास्यामि।'

'तथैव भवतु।'

'पृथ्वीधरवर्य, पद्मपादवर्य, आगच्छताम्, गच्छाम' इति ताभ्यां सह शङ्करः बहिः गतवान्।

अन्तः विद्यमानेन मण्डनेन शिष्याणां द्वारा विलम्बेन वार्ता ज्ञाता।

'भारति, किमिदं कृतवती!' इत्युक्ते सति सा अवदत्; 'सः बालः भवन्तम् आकृष्य नयति चेत् मया तत् दृष्ट्वा तूष्णीम् उपवेष्टव्यं किम्? एकमासात्मकं समयं पृष्ट्वा गतवान् खलु, आगते सति पश्याम।'

द्वाभ्यां शिष्याभ्यां सह शङ्करः गच्छन् अस्ति। ताभ्यां गुरवः अग्रे किं करिष्यन्ति इति ऊहितुम् अपि असाध्यम्। तयोः शरीरे प्रज्ञा अस्तीत्येव न अभासत। परस्परं भाषणं नास्ति। मार्गे प्राप्ते मन्दिरे वा वृक्षस्य अधः वा स्वल्पकालं यावत् उपवेशनं, पुनः अग्रे गमनम् इतीदं विहाय अन्यः कोऽपि व्यवहारः नास्ति। ते कुत्र गच्छन्तः सन्तीति तैरेव न ज्ञायते। भिक्षा नास्ति। द्वित्राणि दिनानि एवमेव अतीतानि। कस्मिंश्चित् गिरिशिखरे गच्छन्तः सन्ति। शङ्करः झगिति स्थितः – 'पद्मपादवर्य, सः कः शब्दः? शृणोतु' इत्यवदत्। शिष्यौ द्वावपि अवधानेन श्रुतवन्तौ।

'आम्, आम्। कश्चन रोदनशब्दः। बहवः जनाः सन्तीति भासते।'

'अहमत्र उपविष्टः भवामि। विचार्य आगच्छताम्।'

पृथ्वीधरः अवदत् : 'पद्मपादवर्य, भवान् दृष्ट्वा आगच्छतु। अहमत्रैव गुरूणां निकटे भवामि।'

गत्वा प्रत्यागतः पद्मपादः अवदत्; 'अमरुकः इति राजा परिवारसमेतः मृगयार्थम् आगतः। मृगयां समाप्य प्रतिनिवर्तनसमये तस्य शिरोभ्रमणम् अभवत्, सः अपतत् । परीक्षायां कृतायां सत्यां प्राणाः एव गताः आसन्। परिवारे २५-३० जनाः सन्ति। सर्वेऽपि रुदन्तः सन्ति।'

शङ्करः अपृच्छत् : 'राज्ञः वयः किम्?'

'प्रायः पञ्चचत्वारिंशद्वर्षाणि।'

'मरणं प्राप्तवतः तस्य कियान् कालः गतः?'

'प्रायः होरात्मकः।'

शङ्करः द्वित्रान् निमेषान् यावत् गाढालोचनायां निमग्नः अभवत्। गिरिप्रदेशं पश्यन्, 'उपरि कुत्रचित् एकान्तस्थलम् अस्ति वा इति दृष्ट्वा आगच्छताम्। जलस्य सौकर्यमपि अस्ति वा इति पश्यताम्। शीघ्रं गत्वा आगच्छताम्' इत्यवदत्।



दृष्ट्वा आगत्य अवदताम् – 'समीचीना एका गुहा अस्ति। पार्श्वे एका निर्झरिणी प्रवहति। वासार्थं योग्या अस्ति।'

अनुक्षणं त्रयः अपि आरोहणं कृत्वा तत्र गतवन्तः। शङ्करः स्थलं परीक्ष्य गम्भीरेण ध्वनिना अपृच्छत्,

'भवतोः कृते एकं महत् दायित्वं ददामि, स्वीकुरुतः वा?'

'गुरुवर्याः, भवन्तः यथा वदन्ति तथा कुर्वः।'

'अहमधुना तस्य राज्ञः शरीरं प्रविशामि। कतिपयदिनानामनन्तरं प्रत्यागमिष्यामि। तावत्पर्यन्तम् अस्य देहस्य रक्षणं भवतोः दायित्वम्। भवतु वा?'

उभावपि शिष्यौ मूढौ इव स्थितवन्तौ। पद्मपादः 'अये!' इत्यवदत्।

'अये इत्युक्ते किम्? इदं शक्यं वा इति भवतः प्रश्नः किम्?'

'शक्यमिति जानामि। मत्स्येन्द्रनाथः इदं कार्यं कृतवान्।'

'तर्हि किम्?'

'परं नूतने शरीरे व्यामोहं प्राप्य सः तस्मिन् एव अतिष्ठत्। तं प्रत्यानेतुं शिष्येण गोरखनाथेन बहुधा श्रमः करणीयः अभवत्।'

'तथा किमपि भवति चेत्, तदेव कार्यं कर्तुं भवन्तौ स्तः खलु?'

'गुरुवर्याः क्षाम्यन्तु। तस्मिन् समये अत्र भवतां शरीरस्य कापि विपत् भवति चेत्?'

'तत् दायित्वं भवतोः मास्तु। तत् अहमेव अवधास्यामि।'

'गुरुवर्याः, अयं प्रश्नः असाधुः इति चेत् क्षाम्यन्तु। संन्यासिनः परकायप्रवेशः पापं न वा?'

'तत्र संसारनिर्वहणकर्ता गृहस्थः? उत संन्यासी?'

'गृहस्थश्चेदपि मनः संन्यासिनः एव खलु?'

'स्वप्नकाले शरीरात् भिन्ने जाते सति जीवस्य पुण्यं पापं वा अस्ति वा? बृहदारण्यकमन्त्रः भवतोः स्मरणे अस्ति न वा?'[१]

'एतावत् साहसं किमर्थं करणीयम्?'

---

१. बृहदारण्यकोपनिषत् ४.३.१५

२. तत्तादृशात्युज्ज्वलकीर्तिराशिः समस्तशास्त्रार्णवपारदर्शी। आसादितो धर्महितः प्रयत्नात्।
– माधवीये शङ्करविजये १३.१०

MahaPariVrajaka

'मण्डनः वशीकर्तव्यः।'[२]

'सः न वशीकृतः चेत् किं भवति?'

'सः भवत्सम्बद्धः विचारः न।'

स्वल्पकालं यावत् मौनम्। अनन्तरं शङ्करः अवदत्, 'इतोऽपि कोऽपि प्रश्नः अवशिष्टः अस्ति किम्?'

'न।'

'मया दीयमानं दायित्वं निर्वोढुं सन्नद्धः अस्ति किम्?'

'सन्नद्धः अस्मि। भवन्तः के इति विस्मृत्य अविचार्य भाषितवान्। उद्वेगे कृतम् अमुं मम दोषं क्षमित्वा यथापूर्वं मम अनुग्रहः करणीयः इति प्रार्थये' इत्युक्त्वा दीर्घदण्डवत् नमस्कृतवान्। पद्मपादः गुहायां शङ्करस्य कम्बलं प्रसार्य, तदुपरि तस्य आच्छादनं दीर्घरूपेण प्रसारितवान्। किन्तु तेन सम्भावितमिव शङ्करः तदुपरि न शयितवान्। पद्मासने उपाविशत्। प्राणायामं कृत्वा, सूक्ष्मशरीरस्य एकांशं देहे एव त्यक्त्वा अन्यैः अंशैः सह ब्रह्मरन्ध्रेण प्रस्थाय, सः राज्ञः देहं तस्य ब्रह्मरन्ध्रद्वारा प्राविशत्। राजनि प्राणसञ्चारः अभवत्। नेत्रे उन्मीलिते। राज्ञः परिवारः 'हो' इति उच्चैः अवदत्। राजा अवदत् :

'किञ्चित् शिरोभ्रमणम् अनुभूय अपतम्। मम न किमपि जातम्। चलाम।' परिवारस्य महदाश्चर्यं, परमसन्तोषश्च। सर्वे राज्ञा सह प्रासादं प्रत्यागताः।

राजा राज्यभारम् अत्यद्भुतरूपेण कर्तुम् आरभत। समस्यासु आगतासु सत्सु सचिवानामपेक्षया तस्य चिन्तनमेव समीचीनमस्ति। तिसृषु पत्नीषु अपि समानं प्रेम अस्ति। त्वरया ज्येष्ठपुत्रस्य युवराजपट्टाभिषेकः अपि जातोऽस्ति। एतत्सर्वं दृष्ट्वा तृतीयपत्न्याः कनकमञ्जर्याः, मुख्यसचिवस्य च सन्तोषापेक्षयापि आश्चर्यमेव अधिकम्। कतिपयदिनेषु गतेषु सत्सु आश्चर्यस्य स्थाने सन्देहः आगतः। 'मृताः पुनः जीवन्ति वा?!' इत्येवं रहस्यरूपेण समालोचनम् अकुर्वन्। अन्ते 'किमपि वा भवतु, अयं राजा रक्षणीयः' इति निर्णयमकुर्वन्। सचिवानां निर्णयं कार्यगतं कर्तुं गूढचारेभ्यः निर्दिष्टसूचनाः गताः। तेभ्यः त्रिचतुरदिनेषु इतिवृत्तानि आगतानि। करणीयानां कार्याणां सूचनाः गताः। प्राप्तसूचनाः प्रहरिणः कार्योन्मुखाः अभवन्।

अत्र गिरेः गुहायां शङ्करस्य शरीरं रक्षन्तौ उपविष्टौ पृथ्वीधरपद्मपादौ मध्याह्ने पर्यायेण उभयोः कृते अपि भिक्षाम् आनयतः। ग्रामः दूरे अस्ति। भिक्षानयनमेव तयोः महत्कार्यम्। आनयनानन्तरम् उभयोरपि भोजनं प्रतिदिनं मध्याह्ने त्रिवादने।



अत्र गुहायाः पृष्ठतः विद्यमाने गुल्मे मन्दध्वनिः।

'द्वयोः अन्यतरः सर्वदापि भवत्येव खलु, किं करवाव भोः?'

'अद्यतनपर्यायः मल्लस्य। सः पेलवः भिक्षामानेतुं गतवान्।'

'सप्ताहात् प्रतिक्षां कुर्वन्तौ स्वः चेदपि अवसरः एव न प्राप्यते खलु भोः।'

'अवसरः प्राप्यते चेदपि किं कर्तुं शक्यं भोः। गुरवः ध्याने उपविष्टाः। पश्यामश्चेदेव कम्पः जायते।'

'बहुभ्यः दिनेभ्यः उपविष्टवन्तः। प्रायः समाधौ सन्ति। शरीरे प्रज्ञा नास्ति। वयं कार्यं समाप्य धावाम भोः।'

तस्मिन् दिने भिक्षानयने पृथ्वीधरस्य पर्यायः। गतः इतोऽपि न प्रत्यागतः। प्रतीक्षां कृत्वा पद्मपादः श्रान्तः। कुतूहलेन प्रायः २५-३० पदानि गिरेः अवतीर्य एकं वक्रप्रदेशं यावत् गत्वा पश्यन् स्थितः सः, अधुना उपविष्टः।

'मल्लः अधः अवतीर्य गतः अस्ति। आगच्छतु, आगच्छतु। अयमेव सुसमयः। शीघ्रं कार्यं समापनीयम्।'

एकः अग्नियुतं घटं गृहीतवान् आसीत्। अपरः स्यूते तैले क्लेदितं वस्त्रं गृहीतवान् आसीत्। उभावपि निश्शब्दतया गुहां प्रविष्टवन्तौ। स्यूतग्राही चिक्कणं वस्त्रं शङ्करस्य शरीरस्य उपरि प्रसारितवान्। तावता घटग्राही फूत्कृत्य, अग्नौ लघुज्वालायाम् आगच्छन्त्यां सत्याम् एकं बृहत् कर्पूरं पातितवान्। क्षणाभ्यन्तरे 'भुग्' इति अग्निः प्रज्वलितः। ज्वालां वस्त्रे योजयित्वा उभावपि पलायितवन्तौ।

शिलायाः उपरि उपविष्टस्य पद्मपादस्य महती चिन्ता। अवधिपूर्त्यर्थम् इतः परं पञ्च दिनान्येव अवशिष्टानि, गुरवः न प्रत्यागताः। अवधिः समाप्तश्चेत् अनन्तरं प्रयोजनमपि नास्ति। मण्डनस्य पत्नी 'अवधिः समाप्तः, गच्छतु' इति वदति चेत् गुरवः किं वा कुर्युः? तथा च गुरवः किमपि साहसं कर्तुं गत्वा किम् असह्यं कुर्वन्ति वा, कः जानाति? तान् वयं पुनः पश्यामः वा, न वा! कति दिनानि शरीरं रक्षितुं शक्यम्?' इति चिन्त्यमाने सति दूरात् पृथ्वीधरस्य आगमनम् अपश्यत्। पद्मपादस्य समीपम् आगच्छति सत्येव किं 'पद्मपादवर्य! कोऽपि दाहगन्धः आयाति खलु' इत्यवदत्।

'आम्, आम्। किं वा, न ज्ञातमेव खलु!'

'गुहां त्यक्तवतः भवतः कियान् समयः अभवत्?'

'प्रायः दश निमेषाः स्युः।'

Mahaparivrajaka

'शीघ्रमागच्छतु, शीघ्रमागच्छतु।'

उभावपि धावितवन्तौ। गुहायां दृश्यमानायां सत्यामेव कम्पितवन्तौ। सचिवानां प्रहरिणः सद्यः एव गुरूणां शरीरे अग्निं प्रज्वाल्य गतवन्तः। उभावपि निर्झरिणीं प्रति धावितवन्तौ। आनीतां भिक्षां निर्झरिण्यां पातयित्वा पृथ्वीधरः भिक्षापात्रे, द्वयोः कमण्डल्वोः च अग्निं शमयितुं जलं प्रपूर्य गतवान्। तदा..

कौपीनधारी शङ्करः हसन् स्थितवान् आसीत्! पृथ्वीधरस्य पद्मपादस्य च दिग्भ्रमः अभवत्। उभावपि नेत्रे प्रोन्मील्य बहुसमयं यावत् गुरून् एव पश्यन्तौ आस्ताम्। अनन्तरं शरीरं परीक्ष्य दृष्टे सति हस्ताङ्गुल्यः, पादाङ्गुल्यः च ईषत् दग्धाः आसन्, धृतानि वस्त्राणि पूर्णतया दग्धानि आसन्। पद्मपादः पादयोः पतित्वा, 'गुरुवर्याः, मह्यं दत्तं दायित्वम् अहं समीचीनतया न निरूढवान्। क्षाम्यन्तु' इत्यवदत्।

'पद्मपादवर्य, लक्ष्मीनरसिंहस्वामी नौ उभावपि रक्षितवान्। किमितः परं चिन्ता? आगच्छतु, पुनः मण्डनस्य गृहं गच्छाम' इत्युक्त्वा गुहां प्रविश्य, वस्त्रग्रन्थितः वस्त्राणि स्वीकृतवान्। निर्झरिण्यां स्नात्वा वस्त्राणि परिवर्त्य माहिष्मतीं प्रत्यागतवान्।

शङ्करेण कृतस्य परकायप्रवेशस्य वार्ता सौदामनीवेगेन माहिष्मत्यां प्रसृता। अमरुकस्य राज्यात् प्रस्थितः शङ्करपरिवारः अवधेः अन्तिमे दिने मण्डनस्य गृहं प्राप्नोत्। मार्गे चलितुमपि कष्टमिव जनाः सम्मिलिताः आसन्। मण्डनः उभयभारती च तस्य प्रत्युद्गमनार्थम् आगतौ। आदौ उभयभारती नमस्कृत्य,

'यतिवरेण्याः, गृहस्थानां स्वभावजन्येन दोषेण अहं वादे मितिम् अतिरिच्य व्यवहृतवती। भवन्तः के इति न ज्ञातवती इत्यतः अयं दोषः अभवत्। भवन्तः धर्मोद्धारार्थम् अवतीर्णः परमेश्वरः इति अधुना अवबोधः जातः। मां क्षाम्यन्तु' इत्यवदत्।

अनन्तरं मण्डनः 'न कर्मणा' मन्त्रं पठित्वा साष्टाङ्गं नमस्कृत्य, 'अहं भवद्भिः सह आगन्तुं सज्जोऽस्मि। तव दासोऽहम्' इत्यवदत्।

शङ्करः भारतीम् उद्दिश्य अवदत्; 'अम्ब, महात्मानः अपि विशेषसन्दर्भेषु स्वस्वभावविरुद्धं प्रवर्तन्ते। तत् विधिम् अनुसृत्य प्रवर्तते, तस्य उपरि तेषां नियन्त्रणं न भवति। अतः सः दोषः इति परिगणनं दोषाय। अहं भवत्यां दोषं न दृष्टवानेव। तत्रभवती मम पूज्या। भवत्या अस्माभिः सह आगन्तव्यम्, अस्माभिः सह एव भवितव्यम्। मण्डनवर्यस्य संन्यासदीक्षार्थम् इतोऽपि समयः अस्ति' इत्यवदत्। परेद्यवि मण्डनः स्वापत्यानां कृते सम्पत्तिं वितीर्य, स्वस्मै इति रक्षितस्य सर्वस्यापि विधिपूर्वकं



Mahaparivrajaka

दानम् अकरोत्। कृतनमस्कारेभ्यः अपत्येभ्यः आशीर्वादम् अकरोत्। अनन्तरं सरलाभूषं धृत्वा प्रस्थातुं सज्जतां कुर्वति सति, उभयभारती अपि सरलम् आभूषं धृत्वा पतिम् अन्वसरत्। माहिष्मतीनगरमेव दुःखेन, आश्चर्येण, भक्त्या च दम्पत्योः आपृच्छाम् अकरोत्। विस्तृतः शङ्करपरिवारः दक्षिणदिशि विद्यमानं श्रीशैलं प्रति प्रयाणमकरोत्।

## ९. श्रीशैलं प्रति

श्रीशैलं स्निग्धैः अरण्यैः निर्झरिणीभिः, गुहाभिः च युतः पर्वतप्रदेशः। तत्र सत्त्वरजस्तमोगुणानां त्रयाणामपि एककाले एव सहजीवनं द्रष्टुं शक्यम्; संन्यासिनां, कापालिकानां, दुष्टमृगाणां च वासस्थानम्। एतेषां सर्वेषां समन्वयनं कृत्वा श्रीशैलपर्वतः कूटस्थरूपेण स्थितः अस्ति। शङ्करपरिवारस्य अत्रागमनं साधूनां, कापालिकानां च आकर्षणेन! वासयोग्यं स्थलं दृष्ट्वा तैः तत्र उषितम्। भिक्षा कदाचित् लघुभ्यः आश्रमेभ्यः प्राप्यते, कदाचित् यात्रार्थिभिः दीयते। यथापूर्वं प्रातः मध्याह्ने च साधूनां संन्यासिनां च समागमाः आरब्धाः। बहुवारं यात्रार्थिनः अपि तेषु भागं गृह्णन्ति स्म। तेषां सर्वेषां कृते अपि शङ्करस्य प्रवचनानि अमृतप्रायाणि आसन्। एकस्मिन् दिने तु शङ्करेण कृतेन आत्मस्वरूपविवेचनेन संन्यासिनः नेत्रे निमील्य, आत्मस्वरूपे एव स्थितवन्तः। तत्र विद्यमानानां यात्रिकाणां तु श्रवणेनैव आनन्दः जातः चेदपि, स्वेषां कृते अप्राप्यं कमपि अद्भुतं विषयं सः पुरस्तात् स्थापितवान् इति असन्तुष्टिः। तेषु एकः अपृच्छत् :

'गुरुवर्याः! वयम् अज्ञाः। किन्तु भवद्भिः उक्तम् अतीव सुन्दरम् इति केवलम् अवगतम्। तत् आत्मस्वरूपम् अस्मत्सदृशाः अपि प्राप्तुं शक्नुवन्ति वा? शक्यं चेत् साधनं किमिति कृपया बोधनीयमिति प्रार्थये।'

'वदामि, शृण्वन्तु। प्राप्तिः अवश्यमेव शक्या। तस्य प्राप्त्यर्थं विद्यते एकः एव मार्गः; स च भगवति भक्तिः। तत् कथमिति पश्यन्तु, साधारणतया मनुष्यः दुःखात् बहिरागन्तुं स्वसामर्थ्यमेव अवलम्बते; तत्र विफलश्चेदेव भगवन्तं शरणं गच्छति। अयं भक्त्याः आरम्भः। अयम् आर्तभक्तः। अनया भक्त्या दुःखं दूरीभवति; यतो हि, भक्तिः दुःखस्य हेतुं पापं नाशयति। दुःखनाशेन उत्तेजितः सः भगवन्तम् अधिकविषयसुखार्थं स्तौति। सः अधुना अर्थार्थी भक्तः। अनया भक्त्या अभिलषितम्

अधिकं विषयसुखमपि प्राप्यते; यतो हि, तेन पुण्यसम्पादनं भवति। भक्तिद्वारा अभिलषितानां सर्वेषां विषयाणां प्राप्त्यनन्तरं, भगवन्तं विस्मृत्य, पापं कृत्वा पुनः आर्तभक्तः भवति। एवम् आर्तभक्त्यर्थार्थिभक्तिस्थितौ एव भूत्वा, सुखदुःखयोरेव निमज्जनेन, जन्मानि यापयन् भवति। किन्तु कदाचित्, विनाभिलाषं भगवतः पूजाकरणस्य कारणेन तस्मिन् एकं परिवर्तनं भवति। सुखं-दुःखम्, लाभः-हानिः इत्यादिद्वन्द्वैः खिन्नः 'अयं भगवान् कः स्यात्? अहमेनं न दृष्टवानेव, अथापि तस्य विस्मरणेन दुःखं, स्मरणेन दुःखनाशश्च जायमानः अस्ति। इमे सुखदुःखे स्यातां नाम, अयं कः?' इति भगवतः जिज्ञासायां प्रवर्तते। अधुना सः जिज्ञासुः भक्तः। इयं जिज्ञासा, भगवान् हृदये प्रविष्टवान् इत्येतस्य लक्षणम्। तस्य कृपया एव एतावत्पर्यन्तं दूरस्थः भगवान् अधुना समीपस्थः भवति। जिज्ञासौ भक्त्या भगवति चिन्तयति सति अन्तः भूत्वा एव सः गुरुं दर्शयति। पुनश्च, गुरोः हृदये विद्यमानः अपि सः एव भगवान्। किन्तु भगवतः दर्शनं कृतवान् इति तस्य विशेषः। अतः भगवान् यथा अस्ति तथा एव तं दर्शयति। तस्य वाण्या 'सर्वेषु आभरणेषु अपि विद्यमानं स्वर्णमेव' इतिवत् 'सर्वेषां हृदये विद्यमानः भगवान् एव मयि अस्ति' इति ज्ञायते। एतावत्पर्यन्तं बहिर्मुखस्य जिज्ञासोः बुद्धिः तदा अन्तर्मुखी भूत्वा भगवतः दर्शनं करोति। अधुना सः ज्ञानी भक्तः। एवम् अन्तर्मुखरूपेण अनेकेषां जन्मनाम् अनन्तरम् आत्मदर्शनं भवति। अतः अस्माकं कदापि भगवतः विस्मरणरूपं दौर्भाग्यं न भवेत्।'

तद्दिनस्य समागमे केचन कापालिकाः उपविष्टाः आसन्। तेषु एकः उत्थाय अपृच्छत् : 'महास्वामिन्, प्राप्तभगवद्दर्शनस्य गुरोः लक्षणानि कानि?'

'भगवान् अत्यन्तं शान्तस्वरूपः। अतः यः तस्य दर्शनं प्राप्तवान् सः अपि शान्तः एव भवति। तस्य व्यवहारः मृदुः भवति। तस्मात् कोऽपि उद्विग्नः न भवति। दुःखे विद्यमानेभ्यः सः करुणया साहाय्यं करोति। वेदोक्तरीत्या सदाचारसम्पन्नः भवति, तस्मिन् केऽपि दुराचाराः न भवन्ति।'

'सद्गुरोः प्राप्तये कः मार्गः?'

'प्रतिदिनं पत्रपुष्पैः भगवान् पूजनीयः। तस्य स्तोत्राणि वक्तव्यानि, तस्य नामजपः करणीयः, सर्वेषां हृदयेषु अपि एकः एव भगवान् अस्ति इति स्मृत्वा सर्वेषां विचारे प्रीत्या व्यवहर्तव्यम्। एतेन तुष्टः भगवान् सद्गुरुं दर्शयति।'

अग्रिमदिनात् समागमे कापालिकानां सङ्ख्या प्रवृद्धा अभवत्। क्रमशः तेषां व्यवहारे प्रगतिः अभवत्। विधिरूपेण पीयमानं मद्यं ते त्यक्तवन्तः। एतेन कापालिक-



स्त्रीभिः शान्तिः प्राप्ता। ताः अपि आगत्य समागमे उपविशन्ति स्म। क्रमशः तेषां गृहेषु परमेश्वरस्य सात्त्विकपूजा आरब्धा। कापालिकानां गृहेषु जातया शान्त्या, तेषां गुरोः उग्रभैरवस्य शान्तिः विनष्टा। स्वस्य शिष्याणां सङ्ख्यायां न्यूनायां जायमानायां सत्यां, शङ्करस्य विचारे उग्रभैरवस्य द्वेषः अधिकः अभवत्। प्रवचनसमये अत्यन्तासहनया उग्रभैरवस्य समीपे एव भ्रमणम्, तदा सभायां उपविष्टानां कापालिकानां तस्य दृष्टितः गोपनप्रयत्नः – इत्येतत्सर्वम् अवलोक्य पृथ्वीधरः पद्मपादेन सह समालोचनम् अकरोत्; गुरूणां क्षेमविचारे जागरूकैः भाव्यम् इति निश्चितम्। शङ्करस्य परकायप्रवेशसमये स्वस्मात् जातेन मुहूर्तमात्रेण प्रमादेन शिक्षितः पद्मपादः, पुनः तादृशः दोषः यथा न स्यात् तथा जागरूकः अभवत्।

शङ्करस्य दैनन्दिनकलापान् विशेषतया परिशीलयन् उग्रभैरवः सः कस्मिन् समये एकान्ते भवति इति ज्ञातवान्। एकस्मिन् दिने स्नानं समाप्य, भस्मधारणं कृत्वा आगत्य एकान्ते विद्यमानान् गुरून् दृष्ट्वा साष्टाङ्गं नमस्कृतवान्। शङ्करः अपृच्छत् : 'कः भोः भवान्?'

'मम नाम उग्रभैरवः। वयं सर्वे कापालिकाः, कालभैरवस्य भक्ताः।'

'भवतः ग्रामः कः?'

'इदम् अरण्यमेव अस्माकं ग्रामः। स्वामिन्! भवतां ग्रामः कः?'

'वयम् एवमेव सञ्चारं कुर्वाणाः। एकः ग्रामः इति नास्ति भोः।'

'इदं स्थलम् अरोचत किम्?'

'बहुसमीचीनमस्ति।'

'भवन्तः ध्यानं कुर्वन्तः उपविशन्ति, अपश्यम्। इतोऽपि उपरि एतदपेक्षयापि समीचीनं स्थलमस्ति। आगच्छन्तु दर्शयामि।'

'मास्तु भोः, अत्रैव सर्वं समीचीनमस्ति।'

'एकवारं दर्शनेन अवगम्यते। आगच्छन्तु, पश्यन्तु।'

'मास्तु भोः।'

'भोजनार्थं किं कुर्वन्ति?'

'भिक्षा।'

'इतोऽपि कति दिनानि अत्र भवन्ति?'

'कार्यसमाप्तिं यावत् भवामि भोः।'

'किं कार्यम्?'

'भवता एव अग्रे ज्ञायते।'

'इत्युक्ते?'

'अस्तु, इतः परं भाषितुं समयः नास्ति। गच्छतु भोः' इत्युक्त्वा मन्दस्मितेन सह पार्श्वे विद्यमानम् आम्रफलं तस्मै दत्त्वा प्रेषितवान्। प्रतिभाषणेन विना अयं प्रस्थितवान्। तत्रैव प्रसारितानां काषायवेष्टीनां पृष्ठतः उपविष्टं पद्मपादं सः न लक्षितवान्।

एकस्मिन् दिने मध्याह्नस्य समागमे समाप्ते सत्येव आगताः सर्वे प्रस्थिताः। शैत्यकालः, बहुशीघ्रमेव अन्धकारः भवति। शङ्करः स्वस्थानं गत्वा उपविश्य ध्यानस्थः अभवत्। पद्मपादः एकं दीपं प्रज्वाल्य बहिरागतः। प्रायः अर्धहोरा अतीता स्यात्। तस्य दीपस्य प्रकाशे एकस्याः छायायाः सञ्चरणम् अवलोक्य अनुक्षणम् अवधानेन अवालोकयत्। अग्रे एकः मनुष्यः, पृष्ठतः एकः शुनकः। ईषदपि शब्दं विना चलनं कुर्वाणः उग्रभैरवः एव इत्यत्र तस्य संशयः नागतः। अनुक्षणम् उत्थाय, मन्दं 'श्' इत्यवदत्। पृथ्वीधरः अपि झटिति सज्जः अभवत्। शङ्करस्य समीपमागतः उग्रभैरवः तमेव निर्निमेषतया दृष्टवान्। खड्गं स्वीकर्तुं हस्ते अन्तः स्थापिते सत्येव शुनकः भषितवान्। अनुक्षणं शङ्करं साष्टाङ्गं नमस्कृत्य प्रतिनिवृत्तः। शुनकः, पृथ्वीधरं पद्मपादं च दृष्ट्वा भषन् तस्य पृष्ठतः अगच्छत्। ततः आरभ्य उभावपि शिष्यौ अत्यन्तं जागरूकतया गुरून् रक्षतः स्म।

अन्यस्मिन् दिने साधूनां समागमः। सामान्यतया होराद्वयं यावत् प्रवर्तमानः कार्यक्रमः सः। तस्मिन् दिने प्रायः एकाहोरां यावत् निर्विघ्नतया कार्यक्रमः प्रवृत्तः। अनन्तरम् उच्चध्वनिना असम्बद्धं प्रलपन् उग्रभैरवः प्राविशत्। आकण्ठं मद्यं पीतवान् अस्ति। भस्मधारणं कृत्वा, मनुष्यशरीरस्य कशेरुमणीनां मालां गले धृतवान् अस्ति। वामकटौ खड्गकोशः लम्बते। 'कः रे शास्त्रवक्ता भवान्! मम स्थानं प्रति आगत्य मामेव स्थानभ्रष्टं करोति वा! अहं कः जानाति वा? उग्रभैरवः। पश्यन् भवतु, अहं भवन्तं किं करोमीति!' इति उच्चैः प्रलपन् क्षणार्धेन खड्गम् उल्लासयन् शङ्करस्य पुरस्तादेव आगत्य स्थितः। साधवः 'हा!' इति चीत्कृतवन्तः। किमितः परम्, खड्गेन गलः यावत् न स्पृष्टः, तावता उद्धृतं तस्य हस्तं पद्मपादः कपिमुष्ट्या आकृष्य, तस्य उदरं जानुना प्रहृतवान्। तस्मिन् अधः पतिते सत्येव, तं खड्गम् आकृष्य तस्य रुण्डं छित्त्वा, अट्टहासेन उच्चध्वनिना हूङ्कारम् अकरोत्। तस्य उग्रस्वरूपं दृष्ट्वा सर्वे कम्पिताः। तस्य शरीरे प्रज्ञा नासीत्। सभायाम् उपविष्टाः कापालिकस्त्रियः अनुक्षणम् उत्थाय गत्वा मन्दिरात् कुङ्कुमभस्मादीन् आनीय तस्य



कृते लेपनं कृतवत्यः; कर्पूरनीराजनं कृतवत्यः; अतीव भक्त्या नमस्कृतवत्यः। स्वल्पसमयानन्तरं पद्मपादस्य मुखं शान्तम् अभवत्। उग्रभैरवस्य भूतपूर्वशिष्याः तस्य शरीरस्य निखननं कृत्वा निःश्वसितवन्तः। दिनद्वयानन्तरं शङ्करपरिवारे दक्षिणदिशं प्रति प्रस्थिते सति कापालिकाः दुःखेन आपृच्छामकुर्वन्।

अनन्तरं तेषां गमनं सप्तगिरिं तिरुपतिं प्रति। पुष्करिण्यां स्नानाह्निकानि समाप्य वेङ्कटेशस्वामिनः दर्शनम् अकुर्वन्। मन्दिरस्य व्यवस्थापकः गुरून् नमस्कृत्य अवदत्:

'महास्वामिन्, अत्र यात्रार्थिनः अधिकया सङ्ख्यया आगच्छन्ति। सर्वेऽपि दीर्घकालं स्थित्वा सेवां कर्तुम् इच्छन्ति। प्रायशः ते सर्वे निर्धनाः। अतः यात्रार्थिनां कृते व्यवस्थाकरणं बहुकष्टं जातमस्ति। अनुग्रहः करणीयः।'

शङ्करः तत्र धनाकर्षणयन्त्रस्य स्थापनं कृत्वा यात्रार्थिनां सौकर्यार्थं शाश्वतव्यवस्थां प्राकल्पयत्।

सुधन्वा इति आन्ध्रदेशस्य एकः राजा तत्र मण्डलसेवार्थम् आगतः आसीत्। भाष्यपाठनसमये आगत्य उपविशति स्म सः। गुरूणां महत्ताम् अवगत्य एकदा एकान्ते आगत्य नमस्कृत्य स्वस्य परिचयं कृत्वा अवदत् :

'भगवन्, भगवद्गीतायां स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः इति प्रोक्तम्। अत्र सिद्धिः इत्युक्ते का? तस्याः सिद्धेः निमित्तं मया आचरणीयं कर्म किम्? इति बोधनीयम् इति प्रार्थये।'

'सुधन्वमहाराज, भवान् बहूत्कृष्टं प्रश्नम् अपृच्छत्। मया वक्ष्यमाणम् अवधानपूर्वकं शृणोतु' इति शङ्करः तस्मै राजधर्मम् उदबोधयत्।

'शाश्वती शान्तिरेव अत्र उक्ता सिद्धिः। परमात्मा अस्याः आवासः। अतः परमात्मनि भवनम् एव जीवनस्य ध्येयम्। इदं ध्येयं प्राप्तुं सर्वेषामपि एकः मार्गः न भवति, यतो हि संस्कारसामर्थ्यानि सर्वेष्वपि समानरूपेण न भवन्ति। एतानि पूर्वजन्मकृतकर्मणां फलम्। एतस्य अनुसारं प्रत्येकं जनस्यापि ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः इति चतुर्षु वर्णेषु कस्मिंश्चित् भगवान् जन्म ददाति। जन्म दत्त्वा तत्तद्वर्णस्य कृते विहितकर्माणि आचरितुं प्रोक्तवान्। कर्म एव धर्मः। सर्वे स्वीयवर्णधर्मम् अनुसरन्ति चेदेव सर्वेषां शान्तिः प्राप्यते। इत्युक्ते, शान्तिः वर्णानाम् अन्योन्यसाहाय्येन जायते।'

पुनश्च, वर्णधर्मस्य, वर्णानाम् ऐकमत्यस्य च रक्षणं राज्ञः धर्मः। वैयक्तिकरूपेण आचरणीयानि श्रुत्युक्तानि नित्यनैमित्तिककर्माणि तु तस्य सन्त्येव। किन्तु राज्ञः,

सामान्यप्रजानां कृते अजायमानाः विशेषप्रसङ्गाः अपि आपतन्ति इत्यतः तस्य बहवः विशेषधर्माः अपि सन्ति। तादृशः प्रसङ्गः अस्माकं पुण्यभूमौ बहुषु स्थलेषु एतावता एव आपन्नः अस्ति। गान्धारे सिन्धुदेशे च म्लेच्छानाम् आक्रमणानि जायमानानि सन्ति। एतानि धनलोभेन जायमानानि आक्रमणानि न; जनानाम् उपरि अपि आक्रमणं कुर्वन्तः सन्ति। किमर्थम्? म्लेच्छधर्मः एव श्रेष्ठः, प्रपञ्चे सर्वैः सः एव अनुसर्तव्यः इति वदन्ति ते। अतः तं प्रसारयितुं मुग्धजनान् मारयन्तः, तेषां गृहाणि भस्मसात् कुर्वन्तः, अस्माकं स्त्रियः नीत्वा मतान्तरस्वीकारं कारयन्तः सन्ति। एते आततायिनः अहिंसालापकेभ्यः बौद्धेभ्यः अस्य दुष्कार्यस्य निमित्तं साहाय्यं प्राप्नुवन्तः सन्ति। वेदविषयकद्वेषेण एव तौ द्वावपि समीपमागतौ। अनेन वेदद्वेषः स्वजनद्वेषं यावत् स्वदेशद्वेषं यावत् च नयति इत्यभवत्। एतादृशीं परिस्थितिं सामान्यजनाः निर्वोढुं न पारयन्ति; राजभिः एव निर्वोढव्यमभवत्। बहुभिः राजनीति-कारणैः बौद्धानां समस्या अधुना प्रायः शान्ता चेदपि, तेषां द्रोहेण स्फूर्तिं प्राप्तवतां म्लेच्छानाम् आक्रमणानि अनुवर्तितानि सन्ति।'

'राज्यलोभेन अस्माकं राजसु एव परस्परं जायमानेषु युद्धेषु, म्लेच्छैः सह जायमानेषु युद्धेषु च अनुसर्तव्याः रीतिनीतयः भिन्नाः। पराजितः म्लेच्छराजः, जितवता राज्ञा सह सुहृद् इव नटनं कृत्वा, अनन्तरं वञ्चनया तं मारयित्वा राज्यं स्वाधीनीकरोति - इत्येतादृशाः प्रसङ्गाः सन्ति। एतावता सुखेन वञ्चनान्तःपतनं समर्थस्य राज्ञः लक्षणं न। अस्माकं द्वयोः राज्ञोः स्पर्धायाः म्लेच्छेन सह मित्रतायाः कारणीभवनं धर्मः न। तादृशप्रसङ्गेषु अनुसर्तव्या नीतिः 'वयं पञ्चाधिकं शतम्।' स्वेषां मध्ये पाण्डवाः पञ्च, कौरवाः शतम्। तृतीयस्य पुरस्तात्, तौ द्वौ मिलित्वा पञ्चाधिकं शतम्। म्लेच्छराजः पराजित्य पलायनं कृत्वा पुनः कदाचित् आक्रमणं करोति। साधारणतया प्रतिवारम् अस्मदीयाः राजानः, तस्य अस्माकं परिधितः बहिः करणस्य एकमेव कार्यं कुर्वन्तः सन्ति। तत् अपर्याप्तम्, तस्य राज्यं प्रविश्य तस्य मूलबलस्य नाशनं करणीयम्। अन्यथा कोषस्य रिक्तीभवनम्, अस्माकं सैनिकानां मरणं च स्थगितं न भवति। सिन्धुदेशस्य अस्माकं राजानः वेतनं दत्त्वा म्लेच्छसैनिकान् नियोजितवन्तः। म्लेच्छैः सह युद्धे जाते सति ते सैनिकाः शत्रुपक्षं गत्वा अस्माकं राज्ञां मरणे कारणम् अभवन्। अतः राज्यस्य सूक्ष्मस्थानेषु परकीयानां नियोजनं न समीचीनम्। अपि च ये देशद्रोहमपि कर्तुं न जुगुप्सन्ते तेभ्यः उग्रदण्डनस्य अकरणमपि अपायकरम्। त्यजेदेकं कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत्, गामं



जनपदस्यार्थे त्यजेत्। एते सर्वेऽपि अद्यतनपरिस्थितौ विशिष्टाः राजधर्माः। भवद्भिः, शान्तैः दान्तैः धर्मनिष्ठैः च ब्राह्मणैः मिलित्वा काले काले समालोचनां कृत्वा धर्मः रक्षणीयः। इदमेव राज्ञः सिद्धिप्रदं स्वकर्मनामकं भगवदर्चनम्।'

द्वित्राणां दिनानामनन्तरं शङ्करेण कर्णाटकं प्रति प्रस्थानस्य चिन्तने कृते सति, तत्र सेवार्थम् आगतः विदर्भराजः 'तत् समीचीनं न' इत्यवदत्। शङ्करः कारणम् अपृच्छत्।

'तत्र कापालिकानाम् उपद्रवः अधिकः अस्ति।'

'तर्हि तत्र अवश्यमेव गन्तव्यम्' इत्यवदत् शङ्करः। विदर्भराजेन तस्य व्यक्तित्वस्य गभीरता नावगता। सुधन्वराजः अनुक्षणम् अवदत् : 'भगवन्, भवन्तः कर्णाटकं प्रति प्रयाणं कुर्वन्तु, अहं सैन्यसमेतः भवद्भिः सह आगमिष्यामि।'

सुधन्वनः इदं वचनं श्रुत्वा, स्वेन उक्तस्य वचनस्य कृते विदर्भराजस्य लज्जा अभवत्। सः मौनेन प्रस्थितः।

## १०. कालटीं प्रति

कर्णाटकं प्रति प्रयाणम् आरब्धम्। पुरतः सुधन्वसैन्यं, पृष्ठतः शङ्करपरिवारः। कर्णाटके क्रकचनामा कापालिकानां नायकः - मद्यपः, क्रूरी, दुष्टश्च। तस्य खड्गधारिकापालिकानाम् एकं लघुसैन्यमेव आसीत्। तस्य भयेन जनाः पूजादीन् स्वगृहेषु एव सीमितान् कृतवन्तः आसन्। सत्सङ्गाः, उत्सवाश्च स्थगिताः एव आसन्। कर्णाकर्णिकया श्रुतेन शङ्करस्य महत्त्वेन आकृष्टाः जनाः तस्य दर्शनार्थम् उत्सुकाः आसन्। अथापि बहिरागन्तुं भयम्। सुधन्वसैन्यस्य रक्षणम् अस्तीति ज्ञात्वा जनाः धैर्येण देवालयेषु तस्य सत्सङ्गानां व्यवस्थाम् अकुर्वन्। जनाः महत्या संख्यया समवेताः। तेषु उत्साहस्य लहरी सञ्चरिता। एतेन क्रुद्धः क्रकचः सैनिकैः सह गत्वा समावेशेषु विघ्नम् उत्पादितवान्। सुधन्वनः सेनापतिः कापालिकसैनिकान् उद्दिश्य उदघोषयत् :

'भवत्सु जीवितुं येषाम् अभिलाषः अस्ति, ते स्वीयशस्त्राणि आनीय संस्थाप्य स्वीयगृहं गन्तुं शक्नुवन्ति; अथवा, देवालये प्रवर्तमानेषु उत्सवेषु भागं गृहीत्वा, आगतानां महागुरूणाम् आशीर्वादं स्वीकृत्य, प्रसादं स्वीकृत्य गन्तुं शक्नुवन्ति। येषां

Maha Parivrajaka

जीवितुम् इच्छा नास्ति, ते केवलं युद्धार्थं सज्जाः भवन्तु। भवतां संहारार्थम् अहं सन्नद्धोऽस्मि।'

कापालिकसैनिकेषु भ्रमः उत्पन्नः। केचन शरणं गच्छामः इत्यवदन्, केचन युद्ध्यामहे इत्यवदन्। अन्ते शरणं गताः एव अधिकाः। अङ्गारः इव ज्वालायुक्तः क्रकचः अवशिष्टैः कतिपयैः एव सैनिकैः सह हूङ्कारं कुर्वन् अग्रे आगतवान्। अनुक्षणमेव सेनापतिः एकेनैव बाणेन तस्य शिरः छित्त्वा पातितवान्। अवशिष्टाः सैनिकाः स्वेषां खड्गान् सेनापतये समर्प्य शरणमागताः। कापालिकानां समस्या कर्णाटके सम्पूर्णतया परिहृता। शङ्करः सुधन्वराजाय आशीर्वादं कृत्वा प्रेषितवान्।

शङ्करस्य ततः दक्षिणभागं प्रति प्रयाणस्य समयः। सपत्नीकेन मण्डनेन, पद्मपादेन च शृङ्गेरीं प्रति गन्तव्यमिति, सः तान् प्रायः एकमासानन्तरम् आगत्य मिलतीति च उक्त्वा प्रेषितवान्। पृथ्वीधरेण सह सः केरलं प्रति प्रस्थितः। केरलस्य सीमायां सन्निहितायां सः अवदत् :

'पृथ्वीधरवर्य, अस्मन्माता स्वस्याः अन्तिमदिनानि पश्यन्ती अस्ति। यदाहं तां त्यक्त्वा प्रस्थितः तदा अन्तिमदिनेषु तया सह भवामि इति प्रतिश्रुतिं दत्तवान् आसम्। अतः अहं कालटीं प्रति गमिष्यामि। एकमासानन्तरं शृङ्गेरीं प्राप्नोमि। भवतः केरले सञ्चरणम् आवश्यकमिति भासते। भवान् अपि तस्मिन् समये शृङ्गेरीम् आगच्छतु। अग्रे करणीयानां बहूनां कार्याणां विचारे तत्र निर्णयं स्वीकुर्मः।'

शङ्करः वेगेन पदानि निक्षिपन् कालटीं प्राप्तः। एतावत्पर्यन्तं गतेषु नूतनस्थलेषु जनाः अत्यधिकसंख्यया सम्मिलन्तः तस्य स्वागतं कुर्वन्ति स्म। किन्तु यत्र तेन जनिः प्राप्ता तस्मिन् ग्रामे सः एकाकी एव गृहं प्राप्नोत्। बाल्यकालस्य स्वस्य शिष्यौ नारायणनम्बूदिरिं, विश्वनाथनम्बूदिरिं च विहाय गृहे मात्रा सह अन्यः कोऽपि नासीत्। सर्वदा बन्धुभिः मित्रैः च पूर्णं गृहम् अद्य शून्यं सन्दृश्यते। शङ्करः सत्वरं गत्वा, मञ्चे शयितवत्याः मातुः पादस्पर्शपुरस्सरं नमस्कृत्य, 'अम्ब, अहं शङ्करः आगतोऽस्मि' इत्यवदत्। माता मन्दं नेत्रे उन्मील्य, हस्तद्वयमपि प्रसार्य अवनतं पुत्रम् आलिङ्ग्य, 'शङ्कर, आगतः किम्, भवान् आगच्छतीति जानामि स्म। कुशली अस्ति वा?' इत्यवदत्।

'अहं कुशली अस्मि, भवती कथम् अस्ति?'

'किमितः परम्, अन्तिमेषु दिनेषु यथा भवितव्यं तथा अस्मि। भवतः भिक्षार्थं कष्टं न भवति किम्? समीचीनतया प्राप्यते वा?'



'प्राप्यते अम्ब! कापि न्यूनता नास्ति।'

'स्वास्थ्यं समीचीनतया रक्षतु भोः।'

'अस्तु अम्ब।'

'गत्वा स्नानं कृत्वा आदौ भोजनं कृत्वा आगच्छतु, नारायण! पाकः जातः चेत् शङ्कराय परिवेषयतु।'

'नारायण, मातुः कः आहारः?'

'परह्यः भोजनं स्वीकृतवती, ह्यः श्राणाम् अपेक्षितवती, दत्तवान्।'

'अम्ब, भवती अधुना कम् आहारं स्वीकरोति?'

'ममापि स्वल्पं भोजनमेव भवतु भोः।'

नारायणः अवदत् : 'गुरुवर्याः, भवताम् आगमनेन मातुः बलम् आगतमस्ति। भोजनमेव इच्छति!' इति सन्तोषेण हसितवान्। प्रक्षालनार्थं स्थापितानि मातुः वस्त्राणि शङ्करः एव प्रक्षाल्य प्रसारितवान्। स्नानमकरोत्। नारायणं पृष्ट्वा, तेनोक्तरीत्या अन्नं मिश्रीकृत्य मातुः सकाशम् अगच्छत्। शयितां ताम् उत्थाप्य उपवेश्य, अन्नं भोजितवान्। अनन्तरं, तस्याम् उपविष्टायां सत्यामेव मञ्चं स्वच्छीकृत्य, शय्यां विधूय शायितवान्। अनन्तरं स्वयं भोजनमकरोत्।

शङ्करः शिष्यौ अपृच्छत् : 'मघमण्डितवर्यः, अस्माकं गुरवः नारायणदीक्षिताश्च कुशलिनः सन्ति वा?'

'उभावपि दिवङ्गतौ। नारायणदीक्षितानां पत्नी अस्ति। पुत्रः गुरुकुलं चालयति। स्नुषा पौत्राश्च सर्वे सन्ति।'

'ओ.., एवं वा.., सकृत् गत्वा दृष्ट्वा आगन्तव्यम्।'

'गच्छाव, अहमपि आगच्छामि।'

पाकं विहाय मातुः अन्याः सर्वाः अपि सेवाः शङ्करः एव करोति स्म। दिनद्वयानन्तरं मातुः शरीरस्थितिः क्षीणा अभवत्। निमीलितनेत्रा आर्याम्बा 'शङ्कर..ऽऽ' इति आहूतवती। 'अम्ब, अत्रैव पार्श्वे अस्मि' इति वदन् शङ्करः मातुः करं गृहीतवान्। सा मन्दं नेत्रे उन्मील्य 'शङ्कर, जनाः भवतः विचारे बहुधा वदन्ति भोः। मम महान् सन्तोषः। अहं धन्या अभवम्। प्रतिश्रुत्यनुगुणं मम एतेषु अन्तिमेषु दिनेषु आगतवान् खलु, महती शान्तिः प्राप्ता। मम अन्त्यकाले मह्यं यत् वक्तव्यं तदुक्त्वा सद्गतिं दापयतु भोः' इत्यवदत्।

'अम्ब, अन्तिमक्षणाः भवत्याः न; शरीरस्य। सद्गतिं प्राप्तुं भवती भवत्येव

खलु!'

'सद्गतिः इत्युक्ते किमिति वदतु।'

'सद्गतिः इत्युक्ते कृष्णे एव अवस्थानम्। तस्मिन् एव एकीभवनम्। भवती प्रतिदिनम् भगवतः कृष्णात् एव उत्थाय आगच्छति, पुनः कृष्णम् एव गच्छति। अधुना शाश्वतरूपेण कृष्णे एव अवस्थातुं गच्छति, तावदेव।'

'प्रतिदिनं तस्मादेव आगत्य, तमेव गच्छामि इत्युक्ते कथं भोः?'

'प्रतिदिनम् अपि गाढनिद्रातः एव उत्थाय आगत्य, गाढनिद्रां प्रत्येव गच्छति खलु! तदेव अहम् उक्तवान्। गाढनिद्रायां भवती कुत्र भवति इति जानाति किम्? कृष्णे एव भवति। अतः एव सर्वथा दुःखरहिते सुखे भवति। सुखं भवति केवलं कृष्णे। बहिः नास्त्येव। मया उक्तम् अवगतं वा?'

'इतोऽपि किञ्चित् वदतु भोः।'

'अम्ब, पश्यतु.. कृष्णसुखे न्यूनाधिक्यं नास्ति। बालिकया सत्या निद्रायां कृतायां सत्यां यत् सुखं प्राप्यते, वृद्धया अपि तदेव सुखं प्राप्यते खलु? कुत्र शयितं चेदपि तदेव सुखं खलु? कदा निद्रा क्रियते चेदपि तदेव सुखं खलु? शरीरस्य सद्भावेन एतावत्पर्यन्तं जागर्ति स्म, कृष्णं विस्मरति स्म। इतःपरं शरीरमपि न भवति, कृष्णमपि न विस्मरति। शरीरम् अस्ति चेदेव खलु विस्मरणम्?'

'न विस्मरामि इत्युक्ते कथं भोः? इतःपरं मम जन्म नास्ति वा?'

'अम्ब, शरीरमेव नास्ति, जन्म कथं भवति?'

'शरीरम् अस्ति खलु?'

'अम्ब, भवत्याः अधुनापि शरीरं नास्ति, कथमिति पश्यतु! गाढनिद्रायां कृष्णे एकीभूय आनन्दावस्थायां विद्यमानायां सत्यां भवत्याः शरीरम् अस्ति वा?'

'नास्ति।'

'तदेव अहम् उक्तवान्। भवती इदं विस्मरति चेत् भवत्याः शरीरसम्बन्धः; अन्यथा शरीरमेव नास्ति।'

'कृष्णस्य एव शरीरमासीत् खलु!'

'आसीत्। सर्वेषां शरीरमिव एकस्मिन् दिने तदपि शरीरं मृतम्। अथापि, कृष्णः अधुनापि नास्ति वा? कृष्णः न गच्छति, न आगच्छत्यपि। सर्वदापि अस्ति। भवती अपि सर्वदा तस्मिन् एव भवति। भवती अपि न आगच्छति, न गच्छति च।'

'शङ्कर, शङ्कर..! अतीव उत्तमं विचारं बोधितवान् भोः। भवता उक्तं



बहुसमीचीनमस्ति भोः; इत्युक्ते शरीरं ममापि नास्ति, भवतः अपि नास्ति। हन्त! इदं शरीरमेव अहम् इति विचिन्त्य कियता प्रमाणेन वित्रस्ता। अधुना ज्ञातम्। विद्यमानः कृष्णः एकः एव। 'अहम्' इत्यपि नास्ति, 'भवान्' इत्यपि नास्ति। इतःपरं व्यामोहः एव नास्ति। दुःखमेव नास्ति। कियत् समीचीनमस्ति! नारायण, विश्वनाथ, आगच्छताम् अत्र। भवन्तौ द्वावपि महतीं सेवां कृतवन्तौ। सुखेन जीवताम्। इतःपरं मया सह केऽपि न भाषन्ताम्। सर्वेऽपि बहिः गच्छन्तु' इत्युक्त्वा नेत्रे निमीलितवती। तस्याः देहत्यागावसरे मध्याह्नसमयः।

नारायणविश्वनाथयोः साहाय्येन शङ्करः शवं बहिरानीय शायितवान्। नदीतः घटेषु जलम् आनीय ते शवस्य उपरि आसिक्तवन्तः। अनन्तरं शङ्करः त्रिवारं प्रदक्षिणां कृत्वा नमस्कृत्य वदने तण्डुलान् स्थापितवान्। 'अम्ब, माम् अत्यन्तं प्रीत्या पोषयित्वा वर्धितवत्याः भवत्याः सेवाम् अहं किमपि न कृतवान्। भवतीम् एकाकिनीं त्यक्त्वा गतवान्। 'मम मुक्तामणिः, मम नयनं, मम राजन्' इति वदन्ती 'चिरकालं जीव' इति येन आशीर्वादं कृतवती तस्मिन् भवत्याः मुखे, अन्तिमक्षणे तण्डुलानां स्थापनम् एव मया कृता सेवा। कृपया मां क्षाम्यतु' इति वदति सत्येव दुःखं प्रोद्भिन्नं सत् नेत्राम्बु प्रवाहरूपेण निर्गतम्।[१] शवस्य उपरि श्वेतवस्त्रेण आच्छादनं कृतम्। नारायणः पुरोहितान् आह्वातुं गतः। तेन सह ग्रामस्य नम्बूदिरिब्राह्मणानां एकः समूहः एव आगतः। तत्रत्यः एकः वृद्धः चर्चाम् आरब्धवान्। 'कर्म कः कुर्यात्? शङ्करेण कर्तुं न शक्यते। यतः यज्ञोपवीतं छित्त्वा क्षिप्तवान् सः। अन्यः कः अस्ति?'

शङ्करः अवदत् – 'नारायणः कुर्यात् खलु?'

'सः जीवत्पितृकः। कथं करोति?'

'तर्हि विश्वनाथः करोतु।'

'एतत् कर्म कर्तुं तस्य कः अस्ति अधिकारः?'

'अन्यः कः कुर्यात्? भवन्तः एव वदन्तु।'

'दश दिनानाम् अपरसंस्कारः, अनन्तरं पूर्णं वर्षं षोडश श्राद्धानि, एतत्सर्वं को वा कुर्यात्? किमर्थं करणीयम्?'

'एनां सम्पत्तिं स्वीकृत्य कर्तुं शक्यं खलु?'

'कास्ति तस्य सम्पत्तिः, पृच्छन्तु' इति सः अवदत्।

अपरः 'भवतः सम्पत्तिः केन अपेक्ष्यते, गच्छतु रे' इति अवदत्।

१. परिशिष्टम् – २ दृश्यताम्

Mahaparivrajaka

शङ्करः किञ्चित्कालं मौनेन भूत्वा ततः 'अहमेव किमपि करोमि, त्यजन्तु' इति शवम् उन्नेतुम् उद्युक्तः।

'येन यज्ञोपवीतं छित्त्वा क्षिप्तं तस्मै श्मशाने शवसंस्कारं कर्तुं वयम् अवसरं न कल्पयामः।'

पुनः स्वल्पकालं मौनेन भूत्वा शङ्करः 'अत्रैव पृष्ठतः वाटिकायां करोमि। भवन्तः सर्वे गन्तुम् अर्हन्ति' इत्यवदत्।

'किमपि वा करोतु, किं तेन अस्माकम्' इत्युक्त्वा ब्राह्मणाः सर्वे प्रस्थिताः। अनन्तरम्, एतं कोलाहलं श्रुतवन्तः अग्रहारात् बहिः निवसन्तः ब्राह्मणेतरे जनाः सर्वे आगताः। ब्राह्मणयुवकाः, शङ्करस्य प्राचीनशिष्याश्च, वृद्धाः यथा न जानीयुः तथा आगतवन्तः। दहनार्थम् आवश्यकानि काष्ठानि शूद्राः आनीय दत्तवन्तः। शवं पृष्ठतः वाटिकां प्रति नीतवन्तः। एतेषां सर्वेषां सहकारेण शवसंस्कारः अभवत्। तदा पादभागे शवयानं ये गृहीतवन्तः ते कालक्रमेण 'काप्पळ्ळि इल्लं' जनाः अभवन्, शिरोभागे ये गृहीतवन्तः ते 'तलेयाट्टिपिळ्ळि इल्लं' जनाः अभवन्। नद्यां स्नानं कृत्वा प्रत्यावर्तनानन्तरं सर्वे शङ्करं नमस्कृतवन्तः। ब्राह्मणयुवकाः अवदन् : 'गुरुवर्याः! वृद्धानां व्यवहारेण भवतां दुःखं सहजम्। वयं सर्वे भवतां शिष्याः। भवताम् आशीर्वादः सर्वदा अस्मासु भवेत्। तेभ्यः अपि भवन्तः मा क्रुध्यन्तु। भवन्तः के इति अज्ञात्वा ते तथा व्यवहृतवन्तः।'[1]

परेद्यवि स्वस्य बाल्यकालीनगुरुकुलमित्राणि, शिष्याश्च सर्वे मिलिताः। शङ्करः गुरुपत्नीं नमस्कृत्य योगक्षेमं विचारितवान्। सर्वेषां प्राचीनस्मरणानि पुनरागतानि। स्वस्य उत्तरभारतप्रवासविचारे सन्दर्भानुसारं यावत् अपेक्ष्यते तावदुक्त्वा, शङ्करः बदरीनाथमन्दिरस्य प्रस्तावं कृत्वा 'तत्र शैत्यकालं विहाय अन्यस्मिन् समये बहवः यात्रार्थिनः आगच्छन्ति। किन्तु समीचीनाः अर्चकाः न सन्ति। तस्मिन् भागे वेदाध्ययनं कुण्ठितमस्ति। अर्चकान् प्रेषयिष्यामि इत्युक्त्वा आगतवानस्मि। भवन्तः पञ्चषाः जनाः तत्र गत्वा तत् कार्यं निर्वहन्ति चेत् धर्मरक्षणं भवति' इत्यवदत्। युवानः उत्साहेन अग्रे आगताः। शङ्करः तत्रत्याय अध्यक्षाय ब्रह्मदत्ताय एतेषां सर्वेषां परिचयपत्रं विलिख्य दत्त्वा तान् बदरीनाथं प्रति प्रेषितवान्। 'अहम् अग्रे शृङ्गेरीं गमिष्यामि' इति सूचयित्वा, द्वितीयवारम् एकाकी एव कालटीतः शृङ्गेरीं प्रति प्रस्थितवान्।

१. शङ्करस्य शिष्यैः रक्षितम् आर्याम्बायाः स्मारकं शृङ्गेरीजगद्गुरवः श्रीनृसिंहभारतीमहास्वामिनः नवीकृत्य यात्रास्थलत्वेन कल्पितवन्तः सन्ति।



# ११. शृङ्गेरीं प्रति

शृङ्गेर्यां तावता सपत्नीकः मण्डनः, पद्मपादश्च वसतिं कल्पयित्वा उषितवन्तः आसन्। पृथ्वीधरस्य प्राप्त्यनन्तरं शङ्करस्य स्वागतार्थं प्राचुर्येण सज्जताः आरब्धाः। जनानां सहकारेण ग्रामः तोरणैः अलङ्कृतः अभवत्। ग्रामस्य बहिर्भागे शङ्करम् आनेतुं केचन प्रतीक्षमाणाः आसन्। ग्रामे शङ्करस्य प्रवेशे जायमाने सत्येव वाद्यानि, पणवाः, जयघण्टाः, घण्टाश्च अनदन्। जयकारः दूरस्थान् ग्रामान् प्रत्यपि प्राप्तः। वेदिकायाम् आसीनः शङ्करः जनस्तोममुद्दिश्य अवदत् :

'शृङ्गेरी अत्यन्तं पवित्रम्, शान्तं, तपसः कृते उत्कृष्टं च स्थलमस्ति। ऋष्यशृङ्गादयः महामुनयः अत्र तपः आचरितवन्तः। अनेके श्रोत्रियाः स्वेषां श्रौतस्मार्तकर्मानुष्ठानेन शृङ्गेरीं धर्मक्षेत्रं कृतवन्तः। पूर्णस्य दक्षिणभारतस्य वेदवेदान्तविद्यानां केन्द्रं भवितुम् इदं स्थलम् अर्हमस्ति। अस्य स्थलस्य अलङ्कारप्रायतया उत्तरभारतस्य माहिष्मती-नगरात् मण्डनमिश्रनामानः महात्मानः अधुना अत्र वस्तुम् आगताः। एते विख्यातानां कुमारिलभट्टवर्याणां साक्षात् शिष्याः। पवित्रचारित्र्यवन्तः। आगामिन्यां चैत्रशुक्लनवम्यां ते संन्यासदीक्षां स्वीकुर्वन्ति। अत्रैव उषित्वा पाठनप्रवचनानि कुर्वन्ति। दक्षिणभारते सर्वत्र सञ्चरन्तः भवन्ति। एतेषां नेतृत्वे शृङ्गेरी दक्षिणभारतस्य सर्वस्य विद्याकेन्द्रं भवतु इति अनुगृह्णातु इति अस्य ग्रामस्य दैवतं शारदां प्रार्थये।'

पूर्वेद्युः मण्डनः कृतोपवासः अष्ट श्राद्धानि विरजाहोमं च अकरोत्। रामनवम्यां संन्यासदीक्षा प्रवृत्ता। मण्डनः सुरेश्वराचार्यः अभवत्। जनस्तोमस्य कृते भवद्भिः आशीर्वचनं करणीयमिति शङ्करस्य अनुरोधानुसारं सुरेश्वराचार्यः अभाषत :

'वेदः अभ्युदयार्थं कर्ममार्गं, ज्ञानमार्गं च सूचयति। अतिश्रमेण क्रियमाणस्य कर्मणः फलम् अत्यल्पमस्ति। एतत् विज्ञाय केचन सकामकर्म परित्यज्य केवलं विधिरूपाणि नित्यनैमित्तिककर्माणि कुर्वन्तः परमात्मानम् आराधयन्ति। एतेन चित्तशुद्धिः वैराग्यं च जायते। एतादृशः विरक्तः एव ज्ञानमार्गस्य अधिकारी। अयं सर्वकर्माणि परित्यज्य, शममाश्रित्य, स्वस्य आत्मनः परमपुरुषस्य चिन्तनं करोति। एतेन परमपुरुषस्य नित्यप्राप्तिरूपं महत् फलं सिद्ध्यति। एतत् श्रेष्ठतत्त्वं बोधयित्वा, मां कर्मबन्धनात् विमुक्तं कृतवन्तः शङ्करभगवत्पादाः। ते मया अत्र भवितव्यमिति आज्ञापितवन्तः। ते यमम् अपि सम्मुखीकर्तुं शक्ताः स्वयं दक्षिणामूर्तिस्वरूपाः

इत्यतः, तेषां कार्यकेन्द्रं दक्षिणे जातम् इति भासते। तैः मदुपरि निहितं दायित्वं महत्। केवलं तेषां महानुभावानाम् अनुग्रहेण, भवतां सर्वेषां सहकारेण च तत् दायित्वं निर्वोढुं शक्नुयाम्। एतदुभयस्यापि पात्रं भवितुम् अहं प्रयते।'

शुक्लयजुर्वेदी औत्तराहः च सुरेश्वरः दक्षिणाम्नायपीठस्य प्रथमाचार्यः अभवत्। तस्य पाठनप्रवचनानि आरब्धानि। तस्य वैदुष्यसच्चारित्र्याभ्यां परिचितानां शृङ्गेरीविदुषाम् अत्यल्पकालेनैव तस्य विषये श्रद्धा भक्तिश्च समजनि।

श्रीबलि इति मङ्गळूरुप्रान्ते अन्तर्भूतः एकः ग्रामः। तम् अधुना शिवळ्ळि इति वदन्ति। ततः दक्षिणाम्नायपीठोद्घाटनसमारोहार्थं शृङ्गेरीं प्रति नैके विद्वांसः, कर्मानुष्ठान-पराश्च आगताः आसन्। तं ग्रामं प्रति शङ्करः आहूतः इत्यतः, सः पृथ्वीधरं, पद्मपादं च स्वीकृत्य तत्र अगच्छत्। तत्र पाठनप्रवचनानि, विचारगोष्ठ्यः च आरब्धाः। पार्श्वस्थग्रामेभ्यः विद्वांसः, साधकाश्च आगत्य सम्मिलितवन्तः। महात्मा आगतश्चेत् स्वेषां दुःखनिवारणार्थम् आर्ताः दर्शनार्थम् आगच्छन्त्येव खलु। एकस्मिन् दिने तादृशः कश्चित् आगत्य नमस्कृतवान्। स्वस्य पुत्रेण अपि नमस्कारं कारयित्वा अवदत् :

'महास्वामिन्, मम नाम प्रभाकरशर्मा। वयम् ऋग्वेदिनः। अयं मम पुत्रः। अस्य द्वादश वर्षाणि पूर्णानि। किन्तु इतोऽपि न भाषते। अस्य कस्मिंश्चिदपि आसक्तिः नास्ति। भोजनार्थम् आहूतश्चेत् आगच्छति, स्वयमेव कदापि न पृच्छति। बालकैः सह न क्रीडितवानेव। उपनयनसंस्कारः क्रियते चेत् सर्वं समीचीनं भवति इत्युक्तवन्तः, तदपि अभवत्। किमपि परिहृतं नाभवत्। भूतचेष्टा भवेत् इत्यवदन्, मान्त्रिकानां निकटं नीतवन्तः। कोऽपि लाभः नाभवत्। वैद्याः अस्य स्वास्थ्यं समीचीनमस्तीति, न किमपि औषधम् अपेक्ष्यते इति च अवदन्। अस्माकम् अयम् एकः एव पुत्रः। भवतां कृपया एव अयं स्वस्थः भवेत्' इत्यवदत्।

शङ्करः तस्य शिरसि करं प्रसार्य 'भवतः नाम किं भोः?' इत्यपृच्छत्। उत्तरं नास्ति।

'अस्य नाम किम्?' इति तस्य पितरं दर्शितवान्। उत्तरं नास्ति।

'किमर्थं भोः एवं जडः अस्ति? वदतु।'

'अहं जडः न। सर्वदापि समानया एव रीत्या विद्यमानः आत्मस्वरूपः अहम्। मयि कस्यापि व्यवहारस्य प्रवृत्तिः नास्ति' इत्युक्त्वा सः तूष्णीकः संवृत्तः। शङ्करस्य सन्तोषः, आश्चर्यं च अभवत्। हस्ते विद्यमानः आमलकः इव आत्मस्वरूपम् अनेन



स्फुटतया ज्ञातमिति दृष्ट्वा शङ्करः तं हस्तामलकः इति आहूतवान्। प्रभाकरशर्मा दिङ्मूढः अभवत्। अवदत् च :

'महास्वामिन्, मम पुत्रः भूतग्रस्तः इति भावयित्वा अतीव दुःखितः आसम्। भवतां कृपया मम दुःखं दूरीकृतम्।' पुनः पुनः शङ्करं नमस्कृत्य पुत्रम् उद्दिश्य 'गच्छाव, आगच्छतु' इत्यवदत्।

'शर्मवर्य, अयम् उत्तमः ज्ञानी इति स्पष्टम्। एतेन मम उपयोगः, न तु भवतः। सर्वदा तूष्णीम् उपविष्टेन एतेन कालान्तरे भवतः पुनः दुःखमेव जायते। अतः एतम् अहं नयामि। मह्यं प्रयच्छतु' इत्यवदत्।

'वृद्धिमिच्छतो मूलमपि नष्टम् - वृद्धेः इच्छया एतेषां निकटम् आगतं चेत् मूलधनमेव गतं खलु!' इति चिन्ताक्रान्तं तं दृष्ट्वा पुनः अवदत् : 'शर्मवर्य, चिन्तां मा करोतु। भवतः अग्रे अपत्यानि भविष्यन्ति। तानि स्वस्थानि, दीर्घायुषा युक्तानि, बुद्धियुतानि, पित्रोः भक्तियुतानि च भविष्यन्ति। एनम् अहं नयामि' इति।

शर्मवर्यः पुत्रम् अपृच्छत् : 'गमिष्यति वा?' सः न भाषितवान्। पितरं नमस्कृत्य गत्वा शङ्करस्य पृष्ठतः अतिष्ठत्! शर्मवर्यस्य नेत्राभ्यां जलमागतम्। मार्जयित्वा प्रस्थितः।

द्वित्राणां दिनानाम् अनन्तरं मध्याह्नस्य सत्सङ्गस्य अन्ते शङ्करः पशुपतिनाथ-देवालयस्य प्रस्तावं कर्तुं भूमिकारूपेण अवदत् :

'भवतां ग्रामे समीचीनं वेदाध्ययनं दृष्ट्वा मम महान् सन्तोषः जातः। किन्तु अस्माकं देशस्य उत्तरस्यां दिशि प्रान्तप्रदेशेषु वेदाध्ययनं कुण्ठितं जातमस्ति। नेपाले तु परिस्थितिः शोचनीया अस्ति। तत्र अतीव प्रमुखं पशुपतिनाथमन्दिरं प्रति यात्रार्थिनः बहवः आगच्छन्ति। किन्तु समीचीनतया पूजाक्रमस्य ज्ञातारः न सन्ति। इतः युवानः केचन गत्वा शास्त्रोक्तरूपेण अर्चनादिकं कुर्वन्तः, अध्यापनमपि कुर्वन्ति चेत् धर्मरक्षणस्य मार्गः भवति। केऽपि सज्जाः सन्ति किम्?'

स्वल्पसमयानन्तरम् एकः 'तत्र व्यवस्थां के कुर्वन्ति?' इत्यपृच्छत्।

'महाराजः एव व्यवस्थां करोति। भवतां कृते सर्वाणि सौकर्याणि कल्पयति।'

'अस्माभिः तस्य सम्पर्ककरणं कथम्?'

'भवतां परिचयसूचकं पत्रं विलिख्य दास्यामि, अहम् एतावता एव तेन सह भाषितवानस्मि। पत्रं प्रदर्श्यते चेत् पर्याप्तम्। भवतां कृते सर्वाणि सौकर्याणि कल्पयति।'

'तर्हि वयं गमिष्यामः' इति पञ्च युवानः पुरतः आगताः। शङ्करः परिचयपत्रं

Maha Parivrajaka

दत्त्वा तान् नेपालं प्रति प्रेषितवान्। अद्यापि सा एव व्यवस्था अनुवर्तमाना अस्ति।

श्रीबलितः प्रत्यागमनानन्तरं शृङ्गेर्यां शङ्करः भाष्यपाठनम् आरभत। प्रायः विंशतिवर्षीयः एकः युवकः पाठनस्य समये उपस्थितः भवति स्म। उन्नतः, बलिष्ठकायश्च। कदापि केनापि सह भाषितवान् जनः न सः। अन्येषाम् अपेक्षया किञ्चित् पूर्वमेव आगत्य कोणे विद्यमानस्य एकस्य स्तम्भस्य समीपे एव सः उपविशति। एकस्मिन् दिने पाठनानन्तरम् अतीव भक्त्या गुरून् नमस्कृत्य सः स्वस्य परिचयम् अकरोत् :

'भगवन्, मम नाम गिरिः, अहं केरलीयः। अहं भवद्भिः सह एव स्थित्वा सेवां कर्तुम् इच्छामि। अस्तु वा?' इत्यपृच्छत् च।

'वेदध्ययनं किमपि जातं वा?'

'प्रायः जातम्।'

'भवतः कः वेदः?'

'अथर्ववेदः।'

'भवतः पितुः जीवनोपायः कः?'

'सः वैद्यः। तस्य लघुवाटिकापि अस्ति।'

'भवान् अत्र आगतवान् इति भवतः पितरौ जानीतः किम्?'

'तयोः अनुज्ञां प्राप्य एव आगतः अस्मि। मम संसारे आसक्तिः नास्ति इति अवदम्। मम मातुः दुःखम् अभवत्। मम जातके संन्यासयोगः अस्तीति उक्त्वा, पिता तां समाहितां कृतवान्। भवतां विचारे सः श्रुतवान् अस्ति। मां भवतां सकाशे प्रेषितवान् सः एव।'

अनन्तरं गुरूणां सेवाकार्यं सर्वमपि तस्यैव अभवत्। दन्तधावनार्थं सज्जीकृतायाः निम्बशलाकायाः दानम्, वस्त्रप्रक्षालनम्, आसनव्यवस्था, अनुष्ठानव्यवस्था इत्येवं सर्वं सः एव करोति स्म।

एकदा सः गुरूणां वस्त्राणि प्रक्षालयितुं नदीं प्रति गतवानस्ति। पाठनारम्भसमयः। सर्वे आगत्य उपाविशन्। अथापि गुरवः पाठनं नारब्धवन्तः। पाठे प्रतिदिनम् आगच्छन् कश्चन गृहस्थः शङ्करं पश्यन्, 'पाठनम् आरब्धुं शक्यं खलु?' इत्यवदत्।

'इतोऽपि गिरिः नागतवान्, प्रतीक्षमाणः अस्मि।'

'गिरिः आगत्य उपविष्टवान् खलु!' इति सः हसितवान्।

'कुत्र?'



'अत्र' इति गिरिः यं स्तम्भम् आश्लिष्य उपविशति स्म तं दर्शितवान्! बहवः हसितवन्तः। गुरवः कामपि प्रतिक्रियाम् अप्रदर्श्य मौनेन आसन्। स्वल्पसमयानन्तरं गिरिः धावन् आगत्य तस्यैव स्तम्भस्य समीपे उपविष्टवान्। अनन्तरं गुरवः पाठनम् आरब्धवन्तः। पाठनस्य अन्ते अवदन् :

'परश्वः गिरिः संन्यासदीक्षां स्वीकरिष्यति। अतः श्वः परश्वः च पाठनं न भविष्यति।'

गिरेः आश्चर्यमभवत्। इतरेषामपि आश्चर्यम्।

संन्यासदीक्षायाः अनन्तरं सम्मिलितायां सभायां शङ्करः नूतनसंन्यासिनं प्रति अवदत् : 'कमपि विषयमाश्रित्य वाक्यचतुष्टयं वदतु।'

सः भीतः। अथापि उत्थाय भाषितवान्, जनान् उद्दिश्य न, गुरून् उद्दिश्य ।

'भगवन्, अहं शास्त्रविषयमाश्रित्य भाषितुं समर्थः न। अधुना मासद्वयात् भवद्भिः कथ्यमानानि अमृतवचनानि विहाय अहं कस्यापि शास्त्रस्य श्रवणमपि न कृतवान्। किन्तु भवतां दर्शनक्षणादेव अहं भवसागरात् दूरं गच्छन् अस्मि इति अनुभवः जायमानः अस्ति। भवतां वचनानां श्रवणानन्तरम् अहम् अन्यं कमपि शास्त्रग्रन्थं न पठितवान् इति दुःखमपि नास्ति। भवन्तः सकलशास्त्रपारङ्गताः। अथापि मत्सदृशे अकिञ्चने अपि अपारकरुणावन्तः सन्ति। भवन्तः मत्सदृशान् अतिदीनान् उद्धर्तुमेव देशे सर्वत्र सञ्चरन्तः सन्ति। भगवन्, अहं भवतां शरणमागतोऽस्मि। माम् उद्धरन्तु' इत्युक्त्वा निपुणकवीनामपि दुष्करेण तोटकवृत्तेन अष्ट श्लोकान् उक्त्वा कम्पमानः, नेत्राम्बु वाहयन् नमस्कृतवान्। अयम् अग्रे तोटकाचार्यः इत्येव प्रसिद्धः अभवत्। एतादृशः अद्भुतचमत्कारः गुरुकृपाफलं विना किमन्यत्! अनन्तरं गिरिं स्तम्भः इति हास्यं कृतवान् गृहस्थः शङ्करं नमस्कृत्य अवदत् :

'अहं परह्यः अनुचितम् उक्तवान्। कृपया मां क्षाम्यन्तु। अहं गिरिः इव यथा साधकः भवेयं तथा अनुगृह्णन्तु।'

'मनः सात्त्विकं सत् अन्तर्मुखं न भवति चेत् वेदान्तश्रवणेन किमपि प्रयोजनं नास्ति। परुषवाक्यभाषणं दोषाय। चिन्तने सात्त्विकताम् अभ्यस्यतु। तदा सहजतया भाषणमपि सात्त्विकं भवति' इत्यवदत् शङ्करः।

कतिपयदिनानामनन्तरम् आषाढशुक्लत्रयोदश्यां प्रदोषे श्रीबलितः शङ्करेण सह आगतः प्रभाकरशर्मणः पुत्रः संन्यासदीक्षां स्वीकृत्य हस्तामलकाचार्यः अभवत्। शङ्करः सुरेश्वरद्वारा स्वस्य बृहदारण्यकतैत्तिरीयभाष्ययोः वार्तिकानां, नैष्कर्म्यसिद्धिः इति स्वतन्त्रग्रन्थस्य च रचनां कारितवान्।

Mahapariajaka

एकस्मिन् दिने यदा पृथ्वीधरः गुरूणां प्रकोष्ठं प्रविश्य नमस्कृतवान् तदनन्तरं गुरवः अपृच्छन् :

'केरले प्रवासं कृतवान् खलु भवान्, तत्र किम् अवलोकितवान् इति नोक्तवानेव!'

'अहं यदा तं विचारं वक्तुम् आगच्छामि स्म तदा सर्वदापि भवन्तः केनापि सह भाषमाणाः भवन्ति स्म। अधुना समयः अस्ति चेत् वदामि।'

'अधुना एव वदतु, समयः अस्ति। अनन्तरं समयः भवति वा न भवति वा, नाहं वक्तुं शक्नोमि!'

पृथ्वीधरः आरब्धवान् : 'सिन्धुदेशे यवनाः क्रौर्येण अस्मदीयान् जनान् स्वमतं प्रति परिवर्तयन्तः सन्तीति भवन्तः एव उक्तवन्तः खलु! केरले पुनः केचन वञ्चनया तदेव कार्यं कुर्वन्तः सन्तीति ज्ञातम्।'

कुतूहलेन गुरवः अपृच्छन् : 'के ते? कीदृशीं वञ्चनां कुर्वन्ति?'

'प्रायः ७०० वर्षेभ्यः अपि प्राक् सिरियादेशे क्रैस्ताः इति केचित् आसन्। तेषां शत्रवः तेभ्यः उपद्रवं कृतवन्तः इति कारणेन ते केरलस्य समुद्रतीरं प्रति स्थानान्तरिताः। सामुद्रियनामा राजा तेभ्यः आश्रयं दत्तवान्। तैः पृष्टं प्रत्येकं स्थलं तेभ्यः दत्तवान्। तेषां प्रार्थनाः प्रवृद्धाः। ग्रामपञ्चायतमध्ये तान् पृथक् जातिः इति परिगणितवान्। तेभ्यः अस्माकं जनानां समानाधिकारस्य ताम्रपत्रं दत्तवान्![1] तेभ्यः दत्ते स्थले एकः तडागः आसीत्। स्नानार्थं पानार्थं च अस्मदीयाः तमेव तडागम् उपयुञ्जते स्म। स्वल्पदिनानामनन्तरं तत्र क्रैस्ताः अपि आगताः। अनन्तरं ते अस्माकं जनान् प्रति अवदन् : 'वयं भारतीयाः न, क्रैस्ताः। वयम् अत्र स्नानं कृत्वा जलं पिबन्तः स्मः। भवन्तः अपि तदेव जलम् पीतवन्तः। अतः भवन्तः अपि क्रैस्ताः एव जाताः।'

अस्माकं मुग्धजनानां मनसि व्याकुलता अभवत्। अयं समाचारः सर्वैः श्रुतः। तदा तत्रत्याः ब्राह्मणाः तेभ्यः बहिष्कारम् उक्तवन्तः! तडागस्य जलम् उपयुक्तवन्तः अस्मदीयाः तदारभ्य अपि क्रैस्ताः एव जाताः सन्ति इति श्रुतम्!'

शङ्करः इमां कथां श्रुत्वा खेदेन हसितवान्। 'अग्रे किं जातम्? वदतु।'

तत्रत्येषु क्रैस्तेषु तदा समूहद्वयम् आसीत्। एकस्य समूहस्य जनानां एतं व्यवहारं निन्दित्वा अपरः समूहः स्वेषां धर्मगुरूणां कृते पत्रम् अलिखत्। ते सरलान् मूढान् च जनान् वञ्चनया क्रैस्तमतं प्रति परिवर्त्य तेभ्यः धनसङ्ग्रहणं कुर्वन्तः सन्ति। तेभ्यः

1. R.G.Pothan : Syrian Christians of Kerala (1963) – p. 22 & p. 32-33;
J.M.Lord : the Jews in India and The Far East (1907) – p. 62-63



MahaParivrajaka

क्रैस्तधर्मं किमपि न बोधितवन्तः। ते न निवार्यन्ते चेत् अत्र क्रैस्तमतस्य अपकीर्तिः भवति' इति तस्मिन् पत्रे सूचितवन्तः।[1] एतत् ज्ञात्वा अपरपक्षीयाः धनसङ्ग्रहणं स्थगितवन्तः। तदा अस्मदीयाः – वयं क्रैस्ताः अपि न, भारतीयाः अपि न इति सङ्कटेन परितप्ताः। अन्ते तेभ्यः धर्मगुरुभ्यः उत्तरम् आगतम् : वञ्चना वा, बलात्कारः वा, किमपि वा क्रियताम्, तत् मुख्यं न। किन्तु परिवर्तनं कृत्वा धनं तु सङ्गृह्णन्तु – इति! तदारभ्य वञ्चनया सह बलात्कारेण अपि मतपरिवर्तनं प्रावर्तत। अस्मासु अधुना सहस्रशः जनाः क्रैस्ताः जाताः सन्ति। धनमपि प्रयच्छन्तः सन्ति!'[2]

शङ्करः अवदत् : 'भवता उक्तं श्रुत्वा हसनीयं वा रोदनीयं वा इति न ज्ञायते। तद्विषये सद्यः कमपि क्रमं स्वीकर्तुम् अस्माकं बलं नास्ति। अतः सः विचारः तथा भवतु, एतावता जाते कार्ये भगवत्याः लीला कथमस्तीति भवानेव पश्यतु। अधुना अस्मासु एकस्मात् वेदात् एकः इव चत्वारः शिष्याः सम्मिलिताः। हस्तामलकाः ऋग्वेदिनः, सुरेश्वराः यजुर्वेदिनः, पद्मपादाः सामवेदिनः, तोटकाः अथर्ववेदिनः! भगवत्याः इयं लीला किं सूचयति, वदतु?'

पृथ्वीधरः मन्दं हसन् अवदत् : 'देशस्य चतस्रः दिशः सूचयति!'

'भवान् सम्यक् उक्तवान्। अधुना सुरेश्वराः दक्षिणदेशम् अवलोकयन्तः सन्ति। हस्तामलकाः पूर्वस्यां, पद्मपादाः पश्चिमस्यां, तोटकाः उत्तरस्यां च उपविशन्ति चेत्, व्यवस्था पूर्णा भवति खलु?'

'गुरुवर्याः, अद्भुतं चिन्तनम्।'

'इतःपरं तिसृषु दिक्षु स्थानानि कानि भवेयुः इति प्रश्नः। पश्चिमस्यां द्वारका, उत्तरस्यां बदरीनाथं च भवतु इति मम चिन्तनम्। पूर्वभागे अहं सञ्चारं न कृतवान्। तत्र स्थलं किं भवेत्? भवतः अभिप्रायः कः?'

'कानि लक्षणानि भवेयुः इति भवन्तः वदन्ति चेत् चिन्तयितुं शक्यम्।'

'स्थलं जनानां परिचितं स्यात्। यात्रास्थलं चेत् उत्तमम्; यतो हि जनेभ्यः वस्तुं व्यवस्था भवति।'

'पूर्वभागे कामरूपे स्थलम् अन्वेष्टुं शक्यम्। तत्र ध्रुवेण तपः आचरितम्।'

'सा दृष्टिः समीचीना एव, किन्तु जनानां तत्र गमनं कष्टम्।'

'तर्हि जगन्नाथस्वामिनः क्षेत्रं पुरी समञ्जसं भवेद्वा?'

1. K.A.Nilakantha Sastri : History of South India (1958) – p. 429
2. Francis Day : The Land of the Perumals (1863) – p. 234

'बहुसमीचीनमस्ति। चतसृषु दिक्षु अपि आम्नायपीठानि भवन्ति चेत् अस्मिन् कार्ये सम्पूर्णदेशः एव यज्ञवेदी भवति। तर्हि भवान् पुरीं प्रति प्रस्थानं करोतु। तत्रत्यान् ब्राह्मणविदुषः, राज्ञः च दृष्ट्वा भाषणं कृत्वा स्थलं निश्चिनोतु। एतावत् सर्वं कर्तुं भवतः कियान् समयः अपेक्षितः भवेत्?'

'तत्र गन्तुमेव मासः अपेक्षितः भवेत्; इत्युक्ते द्वित्रमासास्तु अपेक्ष्यन्ते एव।'

'त्रयः अथवा चत्वारः मासाः वा भवन्तु। प्रयाणार्थं यात्रार्थिनां रथान्, शकटानि च उपयुनक्तु। पद्भ्यामेव गन्तव्यमिति नास्ति। पद्मपादैः, हस्तामलकैः, तोटकैश्च सह अहम् इतोऽपि चतुर्षु मासेषु तत्र प्राप्नोमि। तावता भवतः कार्यं पूर्णं भवेद्वा?'

'भगवन्, भवद्भिः सङ्कल्पितस्य कार्यस्य सिद्धिः भवेदेव। माम् आशीर्भिः अनुगृह्य प्रेषयन्तु।'

पृथ्वीधरः जगन्नाथपुरीं प्रति प्रयाणम् अकरोत्।

परेद्यवि स्वस्य चतुरः संन्यासिशिष्यान् उद्दिश्य शङ्करः अभाषत : 'भवतां सर्वेषां कृते कतिचन मुख्यविचारान् कथयामि, तदर्थम् उचितः समयः प्राप्तोऽस्ति। एकाग्रतया श्रोतव्यम्। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः – मोक्षप्राप्त्यपेक्षया अतिशयितं ध्येयं जीवने अन्यत् नास्ति। किन्तु मोक्षसाधना शान्तिरहिते परिसरे असाध्या। अपि च शान्त्याः धर्मः आधारः। धर्मः कर्मरूपेण व्यक्तः भवति। कर्मणः शास्त्रम् आधारः – तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। अस्य कर्मणः अङ्गद्वयम्; व्यष्टिकर्म समष्टिकर्म च। स्वस्य इष्टानिष्टप्राप्तिपरिहारार्थं क्रियमाणं व्यष्टिकर्म। कूपनिर्माणं, वृक्षारोपणम् इत्यादिपूर्तकर्म समष्टिकर्म। समष्टिकर्मणा इतरेषाम् अनुक्षणं लाभः भवति, स्वस्य कालक्रमेण भवति। स्वाध्यायः व्यष्टिकर्म, प्रवचनं समष्टिकर्म। ब्राह्मणः स्वाध्यायप्रवचने न त्यजेदेव। अपि च प्रवचनं तु ब्राह्मणस्य अधिकारः। तावदेव न, एते ब्राह्मणस्य अतिश्रेष्ठं तपः – स्वाध्यायप्रवचने वेति ना को मौद्गल्यः तद्धि तपस्तद्धि तपः।'

'एते अतिश्रेष्ठं तपः इत्यस्य कारणं किम्? सम्पूर्णसमाजस्य योगक्षेमम् अस्य तपसः आधारेण स्थितमस्ति। यावत्पर्यन्तम् एतत् समञ्जसतया प्रवर्तते तावत्पर्यन्तं समाजे शान्तिः भवति। अस्य ह्रासे जायमाने सत्येव शान्तिः नश्यति। अतः अतीव श्रेष्ठम्। तथैव क्षत्रियस्य प्रजापालनं, युद्धे पलायनाकरणं तपः। वैश्यस्य न्यायमार्गेण वाणिज्यकरणं तपः। सर्वेषाम् आवश्यकानां वस्तूनाम् उत्पादनेन समाजस्य पोषणं शूद्रस्य तपः। किन्तु तत्तद्वर्णजानां तत्तत्तपसः प्रवृत्तिजननदायित्वं ब्राह्मणस्य। ब्राह्मणस्य



अनेन कर्मणा एव अनादिकालात् अयं धर्मः सम्प्रदायरूपेण प्रवहति इत्यत्र इतिहासः एव साक्षी।'

'एवं प्रवचनं कस्यचन वर्णस्य, कस्यचन विषयस्य, कस्यचन समयस्य वा सीमितं न। सत्यमेव; केनचित् एकेन सर्वेषां कृते, सर्वस्य विचारे, सर्वस्मिन् काले च प्रवचनकरणम् असाध्यम्। किन्तु स्वं परितः विद्यमानेभ्यः सर्वेभ्यः वर्णेभ्यः अपि तेषाम् अधिकारम् आश्रित्य, तेषां संस्कारानुसारं सर्वेषां विचाराणां ज्ञानमपि दातव्यम्। अस्यां पुण्यभूमौ प्रधानतया वैष्णवाः, सौराः, शैवाः, शाक्ताः, गाणपत्याः, कौमाराश्च सन्ति। एते सर्वे अपि भगवद्भक्ताः एव – सर्वदेवनमस्कारः केशवं प्रति गच्छति। किन्तु केचन तामसपूजायां निरताः भवन्ति। तेषां देवताश्रद्धायाः बाधाम् अकृत्वा सात्त्विकपूजार्थं तेषां कृते प्रोत्साहनं दातव्यम्। तथैव अन्यस्याः देवतायाः विषये द्वेषः यथा न स्यात् तथा द्रष्टव्यम्। अतः विष्णुसूर्यशिवशक्तिगणपतीनां सर्वेषां पूजायामपि आयतनरूपेण स्थापनं पाठनीयम्। पुराणश्रवणेन एतत् साध्यम्। पुराणश्रवणं न केवलं वेदाधिकाररहितेभ्यः, अपि तु सर्वेषां वर्णानां कृते भवेत्। श्रावयेत् चतुरो वर्णान् – चतुर्णां वर्णानां कृते अपि श्रवणं कारणीयमिति भगवान् व्यासः कथयति। अतः विविधेषु शास्त्रेषु विदुषां निर्माणार्थं, तेषां द्वारा सर्ववर्णानां कृते अपि प्रवचनकारणार्थं च भवतां द्वारा व्यवस्था भवेत्। भवन्तः प्रयत्नेन तेजस्विनः, वर्चस्विनः, दूरदर्शिनः च शिष्यान् प्राप्नुयुः। तादृशाः भवतां दृग्गोचराः भवेयुः चेत् तदर्थं भवन्तः अविरतं सञ्चरणं कुर्युः।

'भाविदिनेषु क्षोभः अधिकः भवतीति मे भासते; सर्वेषु वर्णेषु अपि तमोगुणः वर्धमानोऽस्ति। एतस्य नियन्त्रणार्थं भवन्तः प्रयत्नं कुर्युः। भवन्तः चत्वारः अपि ज्ञानिनः एव सन्ति; श्रवणमनननिदिध्यासनानाम् आवश्यकतायुक्ताः साधकाः न। गुणातीतस्वरूपे तिष्ठन्तोऽपि भवन्तः सत्त्वगुणम् आश्रित्य अस्मिन् महाकार्ये प्रवर्तेरन्। जनेषु भवन्तः केवलं वेदान्तार्थमेव सन्तीति कल्पना न भवेत्। कर्मसङ्गिषु अज्ञेषु सत्कर्म कर्तुं प्रेरणां प्रयच्छन्तु। तमोगुणनाशनं केवलं शास्त्रीयनित्यनैमित्तिककर्मणा एव साध्यम्। चतुर्णां वर्णानाम् अपि मार्गदर्शकाः भवन्तु। सर्वेषां साधकानां कृते अपि भवतां द्वारा लाभः भवतु। भवन्तः चत्वारः अपि चतसृषु दिक्षु स्थित्वा सर्वेषां प्रेम्णः, श्रद्धायाश्च भाजनानि भूत्वा जगद्गुरवः भवन्तु।'

शङ्करे स्वस्य वचनं समापयति सत्येव चतुर्णां शिष्याणाम् अपि नेत्राम्बुस्रावः अभवत्। 'गुरवः अस्मत्तः दूरं गच्छन्ति वा?' इति शङ्का तान् शोके निमज्जितवती।

शङ्करस्य प्रेम्णः पुरस्तात् तेषाम् आत्मज्ञानं पराजितम्।

शङ्करस्य पुरीं प्रति गमनसमयः आगतः। सः आदौ उभयभारतीदेव्याः सकाशं गत्वा साष्टाङ्गं नमस्कृतवान्। सा अनुक्षणं पृष्ठतः गत्वा 'किमिदम्? मया भवतां कृते नमस्कारः करणीयः। भवद्भिः मम कृते न' इत्यवदत्।

'अम्ब, भवती एव अस्य स्थलस्य शारदा, अहं भवत्याः पुत्रः। अधुना प्रस्थानं कुर्वन् अस्मि। कृपया आशीर्वादं करोतु।'

'पुनः अत्र कदा आगमिष्यन्ति?'

शङ्करः मन्दं हसित्वा प्रस्थितः। तस्याः वदनात् वचनमेव न निःसृतम्। 'अस्य मयि महती प्रीतिः अस्ति वा, स्वल्पापि प्रीतिः नास्ति वा, न ज्ञायते खलु! अन्तेऽपि प्रहेलिकारूपेणैव अस्ति खलु! कोऽयं बालकः? सर्वदापि कार्यं कार्यं, सञ्चारः सञ्चारः। अहो! कियन्तं श्रमं करोति!' अञ्चलेन वदनम् आच्छाद्य रुदितवती।

'हन्त! अयं मम पुत्रादपि अधिकः अभवत् खलु! अस्य बालकस्य विषये मम व्यामोहः दोषाय। दोषश्चेत् किम्! सः मम आत्मा एव खलु! अतः एव अयं व्यामोहः... न, न। अयं व्यामोहः दोषाय एव। अस्मिन् भेदभावः @स्ति। एतत् न समीचीनम्। अस्मात् अधीतं तत्त्वं मया अनुष्ठातव्यमेव। इतःपरम् अहं भारती इति भावं परित्यज्य मम आत्मनि एव तिष्ठामि' इति स्वयमेव वदन्ती नेत्रे मार्जितवती।

शङ्करः अत्र सुरेश्वरस्य सकाशमागतः। झटिति उत्थाय सः गुरून् नमस्कृतवान्।

'अहम् प्रस्थानं करोमि। इतःपरं पुर्यां हस्तामलकाः, द्वारकायां पद्मपादाः, बदरीनाथे तोटकाश्च निवसन्ति। सद्यः पुरीं प्रति गन्तव्यम्' इत्युक्त्वा, रुदतः सुरेश्वरस्य एकं वचनमपि वक्तुम् अवसरः न भवेदिव, त्रिभिः शिष्यैः सह प्रस्थितवानेव। तस्य प्रस्थानं शृङ्गेर्यां कैरपि न ज्ञातमासीत्। सः सर्वदापि तथैव। एकं ग्रामं गच्छति चेत् सहस्रशः जनाः भवन्ति। प्रस्थानसमये कमपि अनुक्त्वा प्रस्थानं करोति। शङ्करस्य प्रस्थानात् दिनत्रयानन्तरं समाधौ उपविष्टा सती एव उभयभारतीदेवी शरीरं विधूतवती। तस्याः आत्मा शृङ्गेरिशारदायां लीनः अभवत्।



Maha Parivrajaka

# १२. पुरीं प्रति

शङ्करपरिवारे प्रविशति सत्येव तस्य प्रदेशस्य महाराजः ग्रामद्वारे एव पूर्णकुम्भ-स्वागतमकरोत्। जगन्नाथमन्दिरस्य ब्राह्मणसमूहः वेदघोषमकरोत्। तालमेलाः अनदन्। गगनभेदिजयकाराः अभवन्। राजा शिबिकां प्रदर्श्य शङ्करं तस्याम् उपवेष्टुं प्रार्थितवान्। सः ताम् एकवारं स्पृष्ट्वा पद्भ्यामेव अगच्छत्। प्रासादस्य पुरस्तात् विशाले प्राङ्गणे सभायाः आयोजनम्। महाराजः आदौ शङ्करस्य पादपूजामकरोत्। अनन्तरं पृथ्वीधरेण शङ्करस्य परिचयः, अनन्तरं शङ्करस्य आशीर्वचनं च अभवत्।

परेद्यवि आरभ्य पाठनप्रवचनानाम् आरम्भः। तन्मध्ये, विदुषां श्रोतॄणां स्वशास्त्राणाम् अध्ययनस्य आधारेण प्रश्नकरणम्, अनेन युवसंन्यासिना उत्तरदानम् एतत् सर्वं प्रचलति स्म एव। एतेन प्रभावितः राजा स्वस्य राज्यस्य सर्वेषां विदुषां कृते अपि अस्मिन् कार्यक्रमे भागं ग्रहीतुम् आह्वानं दत्तवान्। शङ्करस्य इच्छा अपि सा एव।

एकस्मिन् दिने कश्चित् युवकः प्रश्नम् अपृच्छत् : 'गुरुवर्याः! भगवान् जगतः सृष्टिं किमर्थम् अकरोत्?'

'जीवानां भोगमोक्षाभ्यां कृतवान्। जगत् नास्ति चेत् जीवस्य भोगः अपि असाध्यः, मोक्षः अपि असाध्यः।'

'जगतः सृष्टेः बहुकालानन्तरं जीवानां सृष्टिः अभवत्। तेषां निमित्तमेव सृष्टिः जाता इति कथनं कथं समीचीनं भवेत्?'

'तथा न। जीवः जनिमपि न प्राप्नोति, मरणमपि न प्राप्नोति। सर्वदापि भवति। 'न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः' इति भगवद्गीतावाक्यं श्रुतवान् खलु?'

'श्रुतवान्। किन्तु नावगतम्। पूर्वम् अभूताः नूतनतया जनिं प्राप्नुवन्ति, जनिं प्राप्तवन्तः मरणं प्राप्नुवन्ति इति भावितवान्।'

'तत् न समीचीनम्। शरीरस्य जन्म मरणं च प्रत्यक्षम्। किन्तु तस्य अन्तः विद्यमानः जीवः जनिमपि न प्राप्नोति मरणमपि न प्राप्नोति। जीवः शरीरात् भिन्नः एव।'

'तत् कथम्?'

'कथमिति पश्यतु। भवान् शयनं करोति गृहे। किन्तु अनन्तरं स्वप्ने कुत्रचित्

भ्रमति। तदा भवतः शरीरस्य उपरि सर्पः सर्पति चेदपि भवता न ज्ञायते। अतः तदा भवान् शरीरात् भिन्नः इति स्पष्टं खलु?'

'सत्यम्। भवताम् उत्तरेण महान् उपकारः अभवत्। अयं स्वानुभवः इति कारणेन अस्य निराकरणम् असाध्यम्। किन्तु एकः संशयः, शरीरात् भिन्नः चेदपि, शरीरेण सह अहमपि जनिं प्राप्नुवन् एव किमर्थं न स्याम्?'

'जीवः तथा मरणशाली अपि न। कथमिति पश्यतु। कोऽपि वा भवतु, स्वयम् अभ्यस्तं कार्यमेव कर्तुं शक्नोति, नाभ्यस्तं चेत् न करोति। किन्तु सद्यः एव जनिं प्राप्तः शिशुः स्तन्यपानं करोति, तत् अधुना अभ्यस्तं न। अथापि करोति। तथैव इतरप्राणिष्वपि। अण्डात् बहिरागच्छन्ती सत्येव गृहगोधिका मक्षिकां गृहीत्वा गिलति। स्पृष्टः वृश्चिककिशोरः दशति। एतत्सर्वं कथं साध्यम्? पूर्वतनजन्मसु अभ्यस्तमेव जीवः अधुना अस्मिन् जन्मनि कुर्वन् स्यात्। एवम्, अस्य शरीरस्य जन्मनः पूर्वं जीवः अपरस्मिन् शरीरे आसीदिति सिद्धं भवति।'

'किन्तु अधुना एकः सन्देहः। मया अधुना क्रियमाणं कार्यं मया अस्मात् शरीरात् अभ्यस्तम्। अभ्यस्तः अनुभवः बुद्धौ भवति। सा बुद्धिः अस्मिन् शरीरे भवति। पूर्वतनजन्मनि अभ्यस्तस्य अनुभवः, तदानीन्तनशरीरस्य नाशे सति नष्टः न भवति वा? अनुभवः अस्य शरीरस्य कृते कथमागतः?'

'भवतः प्रश्नः समीचीनोऽस्ति। उत्तरम् एकाग्रतया शृणोतु। इदं स्थूलशरीरं जडं – स्वतन्त्रतया कार्यकरणसामर्थ्यरहितम्। पञ्च कर्मेन्द्रियाणि एतेन द्वारा कार्यं कारयन्ति। तानि सर्वाणि संयोज्य वाक् इति वदामः; पञ्च ज्ञानेन्द्रियाणि, मनः च संयोज्य मनः इति वदामः। अपि च पञ्च प्राणाः – तान् सर्वान् संयोज्य प्राणः इति वदामः। एतत् त्रयमपि शरीरात् भिन्नम्। एतानि शरीरद्वारा एकैकामपि क्रियां यदा कारयन्ति तदा इयं क्रिया एतेषां त्रयाणाम् उपरि आगत्य प्रतिक्रियां करोति। उत्तमक्रियां कारयति चेत् उत्तमप्रतिक्रिया, दुष्टक्रियां कारयति दुष्टा प्रतिक्रिया भवति। उत्तमक्रिया, तद्विरुद्धां दुष्टप्रतिक्रियां नाशयति, दुष्टक्रिया तद्विरुद्धाम् उत्तमप्रतिक्रियामपि नाशयति। मरणकाले समीपमागते सति मनुष्यः शय्यामालिङ्गति। वाङ्मनःप्राणेषु आदौ निर्बन्धः भवति वाचः। एतावत्पर्यन्तं वाचः उपरि जातासु विविधासु प्रतिक्रियासु काश्चित् स्वीकृत्य वाक् स्वस्य व्यवहारं स्थगयित्वा घनरूपं प्राप्नोति। अस्य घनरूपस्य आकारं वाग्वृत्तिः इति वदन्ति। एतत्, इतोऽपि व्यवहाररते मनसि गत्वा मिलति। तदा पश्यन्, शृण्वन् च भवति चेदपि भाषितुं न शक्नोति। इतःपरं मनसः पर्यायः।



एतावत्पर्यन्तं तस्य उपरि जातानां प्रतिक्रियाणां राशौ एकम् अंशं गृहीत्वा चलनं त्यक्त्वा घनीभवति। एतत् मनोवृत्तिः इत्युच्यते। एषा गत्वा प्राणे मिलति। अनन्तरं वाङ्मनसी इव प्राणः स्वस्य उपरि जातानां प्रतिक्रियाणाम् एकम् अंशं गृहीत्वा प्राणवृत्तिं प्राप्य व्यवहारं स्थगयति।'

'वृत्तयः इत्युक्ते किम्?'

'वाग्वृत्तिः, मनोवृत्तिः, प्राणवृत्तिः च भाविनः शरीरस्य वाङ्मनःप्राणानां च बीजरूपाः। एतदनुसारमेव अग्रिमं जन्म। एवं पूर्वतनजन्मनः अस्मिन् जन्मनि स्वीकृत्य आनीतं कर्म प्रारब्धकर्म इत्युच्यते।'

'एतासु वृत्तिषु प्रतिक्रियाणाम् एकः अंशः आगतः चेत्, अपरः अंशः किं भवति?'

'अपरः अंशः भाविनि काले कदाचित् अनुभोक्तुं वाङ्मनःप्राणेषु तथैव अवशिष्टः भवति। तं कर्मभागं सञ्चितकर्म इति वदन्ति। अस्मिन् जन्मनि कृतम् आगामिकर्म। एवं वाग्वृत्तिम् आधृत्य मनोवृत्तिः, ताम् आधृत्य प्राणवृत्तिश्च अस्ति। जीवात्मा एतासाम् अन्तः भवति। अनन्तरम् इयं प्राणवृत्तिः शरीरस्थं तापम् आच्छाद्य नवद्वारेषु कस्यचन एकस्य द्वारा निर्गच्छति। जीवात्मा ताभिः सह निर्गच्छति। एतावत्पर्यन्तं यत् शरीरं सुन्दरम् आसीत् तत् भयङ्करं दृश्यते। यस्य शरीरस्य सत्कारार्थं बन्धुमित्राणि स्वागतीकुर्वन्ति स्म, अधुना तत् शरीरं पत्नी द्रष्टुमपि बिभेति।

> यावत्पवनो निवसति देहे तावत्पृच्छति कुशलं गेहे।
> गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन् काये।।

अतीव आशया, बहुश्रमेण च प्राप्तं सर्वस्वमपि स्वस्य मरणकाले त्यक्त्वा गम्यते इति निस्सन्दिग्धं चेदपि आशां न त्यजति।

> अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम्।
> वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम्।।

स्वं यः न त्यजति, स्वेन सह सर्वदापि यः भवति तस्य परमात्मनः विचारे एकवारं वा चिन्तितं वा! बाल्यं क्रीडया गतम्। यौवनं कामेन गतम्। वार्धक्यं चिन्तया गतम्। अहं जनिं प्राप्य किमर्थं जीवामि इति एकक्षणमपि न आलोचितं खलु?

Mahaparivrajaka

बालस्तावत् क्रीडासक्तः तरुणस्तावत् तरुणीसक्तः।
वृद्धस्तावत् चिन्तासक्तः परे ब्रह्मणि कोऽपि न सक्तः।।

एकैकस्मिन् जन्मनि अपि विभिन्नाः पतिपत्नीपुत्रपुत्र्यः। तदा तदा तेषु तेषु व्यामोहः। अनन्तरं ते के? अहं कः? एतेषां बान्धव्यानां कः अर्थः?

का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः।
कस्य त्वं वा कुत आयातः तत्त्वं चिन्तय तदिदं भ्रातः।।

अहो! इदमेव खलु जीवनम्!

अनन्तरम् अस्य शरीरस्य दहनम् अथवा निखननं कुर्वन्ति। किन्तु अस्मिन् शरीरे यः जीवः वसति स्म सः वाङ्मनःप्राणवृत्तिभिः युक्तः लोकान्तराणि प्रति गच्छति। अत्र अनुभोक्तुम् असाध्यं कर्मफलं तेषु लोकेषु अनुभवति। पुण्यफलम् अस्ति चेत् स्वर्गादीन् प्रति, पापफलमस्ति चेत् नरकान् प्रति च गन्तव्यम्। एतानि पुण्यपापानि अपि वाङ्मनःप्राणवृत्तिषु अन्तः भवन्ति। तत्रत्यफलानुभवार्थम् आतिवाहिकनामकं विशेषशरीरं प्राप्नोति। एतेषु पुण्यपापेषु न्यूनम् आदौ, अधिकम् अनन्तरं च अनुभोक्तव्यम्। भोगेन तेषां पुण्यपापानां समाप्त्यनन्तरम् अवशिष्टं कर्म अनुभोक्तुं भूमिं प्रत्यागच्छति।'

'तादृशाः लोकाः सन्तीत्यस्य प्रमाणं किम्?'

'शास्त्रमेव प्रमाणम्। अथापि तादृशाः लोकाः भवेयुः इति अनुमातुमपि शक्यम्। कथमिति चेत्, जीवः स्वप्ने स्थूलशरीरात् भिन्नः यदा भवति तदा विलक्षणस्थलेषु विलक्षणानुभवान् प्राप्नोति इति सर्वे जानन्ति। तद्वदेव मरणानन्तरमपि शरीरं त्यक्त्वा वाङ्मनःप्राणैः युक्ते सति सुखदुःखानि अनुभोक्तुं शक्यन्ते।'

'स्वप्नलोकः कल्पनामात्रमेव खलु?'

'स्वप्नलोकश्चेदपि अनुभूयमानानि सुखदुःखानि कल्पना न खलु! दुष्टस्वप्नाः दृश्यन्ते चेत् केऽपि वा भवन्तु परिहारं वाञ्छन्ति। भवतु। अनन्तरं भूमौ अग्रिमजन्मनः प्राप्तिः इत्थम् : वृष्टिद्वारा जीवः आगत्य धान्येषु युक्तः भवति। ततः स्वस्य वाङ्मनःप्राणवृत्तीनाम् अनुगुणं शरीरं प्राप्तुं योग्यः पिता प्राप्तव्यः। तदर्थं प्रतीक्षणीयं भवेत्। तावता तत् धान्यम् अन्ये खादन्ति चेदपि, तस्य जीर्णनानन्तरं तेषां मलमूत्राणां द्वारा बहिरायाति। एवम् अटन् कालक्रमेण पितुः शरीरस्य अन्तः गच्छति। ततः मातुः शरीरम्। तस्याः गर्भे शुक्लशोणितयोः सम्मेलनेन शरीरोत्पत्तिः आरभ्यते। घनीभूता प्राणवृत्तिः षष्ठे सप्ताहे उन्मुक्ता भूत्वा कार्यगता भवति। अष्टादशे सप्ताहे



मनोवृत्तिः उन्मुक्ता भवति। ततः आरभ्य गर्भे भूत्वा एव सुखं दुःखं च अनुभवति। नवमासानां गर्भवासं समाप्य बहिरागच्छति सत्येव वाग्वृत्तिः सम्पूर्णतया कार्यगता भवति। मरणकाले वृत्तीनां क्रमस्य विरुद्धरूपेण जननकाले उन्मुक्ताः भवन्ति। प्राणवृत्त्यनुसारं पुरुषः, महिला, षण्ढः, रोगी, नीरोगी वा भूत्वा, मनोवृत्त्यनुसारम् उन्मत्तः, मूढः, सामान्यः, मेधावी, योगी वा भूत्वा, वाग्वृत्त्यनुसारं मूकः, अस्पष्टभाषी, वाग्मी, मौनी वा भूत्वा जनिं प्राप्य प्रवर्धते। एकः इव अपरः नास्ति खलु, किमाश्चर्यम्! एकैकस्यापि स्थितेः तस्य कर्म कारणम्। प्रवर्धमानः पुनः कर्म कृत्वा तेषां पापपुण्यानाम् अनुसारं वृत्तीः प्राप्य पुनः गच्छति, पुनः आगच्छति। एवं जननमरणानि त्रिका इव।

पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्।
इह संसारे बहुदुस्तारे कृपयापारे पाहि मुरारे।।

अनादिकालात् भ्रमणं कुर्वत्याः अस्याः त्रिकायाः दूरं गन्तुं विद्यमानः एकः एव मार्गः भगवत्कृपासम्पादनम्। एतत् न क्रियते चेत् जीवनं सर्वं मूढसाहसे एव गच्छति। अहम् एकदा गङ्गातीरे अपश्यम्, नवतिवर्षीयः एकः वृद्धः डुकृञ् करणे इत्येवंरूपेण व्याकरणसूत्राणि कण्ठस्थानि करोति स्म। मूढसाहसस्य इदमुदाहरणम्। सर्वे वदन्तु

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते।
सम्प्राप्ते सन्निहिते काले न हि न हि रक्षति डुकृञ् करणे।।'

सर्वे भक्त्या अवदन्। नामस्मरणं समाप्तम्। अथापि कोऽपि नोत्थितवान्। बहुसमयं यावत् सभायां गाढं मौनम् आवृतमासीत्। अनन्तरं सभा मन्दम् उत्थाय गुरून् नमस्कृत्य विकीर्णा।

एकस्मिन् दिने सभायां सः सर्वेषां हृदयङ्गमतया धर्मस्वरूपं बोधयित्वा, तस्य रक्षणार्थं पुर्यां पूर्वाम्नायपीठस्थापनस्य प्रस्तावम् अकरोत्। हस्तामलकाचार्याणां परिचयं कारितवान्। महाराजः शङ्करस्य अमुम् अभिप्रायं सम्पूर्णतया अनुमोद्य पीठस्थापनार्थम् आदेशं प्रायच्छत्। तत्सम्बद्धाः अधिकारिणः पृथ्वीधरेण सह समालोचनां कृत्वा कार्यप्रवृत्ताः अभवन्। शीघ्रमेव पुर्यां पीठस्थापनम् अभवत्। तत्रैव पृथ्वीधराय संन्यासदीक्षां दत्वा, कतिपयदिनानाम् अनन्तरं पद्मपादतोटकपृथ्वीधरैः सह शङ्करः द्वारकां प्रति प्रस्थितः। हस्तामलकाचार्याः पुर्यामेव उषितवन्तः।

## १३. द्वारकां प्रति

द्वारका परिचितं स्थलम्। तत्र एतावता एव गोविन्दभगवत्पादानां शिष्यसमूहः अस्मिन् कार्ये निरतः अस्ति। प्रायः १२-१३ वर्षाणाम् अनन्तरं जातेन शङ्करस्य पुनर्दर्शनेन तत्रत्येषु जनेषु उत्साहः प्रवृद्धः। तत्र पश्चिमाम्नायपीठस्य स्थापनं सुखेन अभवत्। पद्मपादाचार्याः पश्चिममण्डलस्य जगद्गुरवः अभवन्। द्वारकातः द्वाभ्यां शिष्याभ्यां सह अग्रिमं प्रयाणं सोमनाथं प्रति। तत्र तु जनाः महत्या संख्यया सम्मिलिताः आसन्। कतिपयदिनानि यावत् तत्र वस्तुं शङ्करः निरचिनोत्। बहुभ्यः गृहेभ्यः भिक्षार्थम् आह्वानम्। सर्वेषां गृहं गन्तुं तावान् समयः नास्ति। अतः कतिपयगृहाणि चेतव्यानि अभवन्। शङ्करः शिष्येभ्यः अवदत् : 'श्वः अस्माकं सर्वेषां यज्ञेश्वरदीक्षित-वर्यस्य गृहे भिक्षा। तस्य देवलनामा एकः पौत्रः अस्ति, तस्य वयः अधुना प्रायः पञ्चदश वर्षाणि स्युः। तस्य गृहं प्रति यदा गच्छामः तदा भवन्तौ द्वावपि तं परिचिनुताम्।'

परेद्यवि त्रयः अपि तत्र भिक्षार्थम् अगच्छन्। दीक्षितवर्यः शङ्करस्य पादौ प्रक्षालितवान्। अनन्तरं तोटकं पृथ्वीधरं च आहूतवान्। तौ पादप्रक्षालनं नाङ्गीकृतवन्तौ। स्वयमेव पादौ प्रक्षाल्य अन्तः अगच्छताम्। तत्र त्रीणि पत्राणि स्थापितानि दृष्ट्वा 'आदौ गुरूणां भवतु, आवां द्वौ अनन्तरं सर्वैः सह उपविशावः' इत्युक्त्वा, पत्रद्वयं निष्कासयितुम् अवदताम्। यज्ञेश्वरवर्यः अवदत् :

'वयं तु म्लेच्छानां शासने प्रवृद्धाः। वयं कानपि क्रमान् न जानीमः, क्षाम्यन्तु।'

'गुरूणां भिक्षा अभवत्। अनन्तरं सर्वे यदा भोजनार्थम् उपाविशन् तदा पृथ्वीधरः देवलं स्वस्य पार्श्वे उपवेष्टुम् आहूतवान्। सः नाङ्गीकृतवान्। 'भवतोः भोजनानन्तरम् अहम् उपविशामि, अहं परिवेषयामि' इति च अवदत्। इतरे अपि स्वेषां पत्राणि त्यक्त्वा उत्थिताः! तयोः द्वयोरपि भोजनानन्तरं तृतीयावृत्तौ इतरेषां भोजनमभवत्। एतेन पृथ्वीधरपद्मपादयोः देवलस्य परिचयः अभवत्।

भोजनानन्तरं शङ्करस्य हितवचनानि श्रोतुं सर्वे उपाविशन्। देवलः - 'गुरुवर्याः, कांश्चन प्रश्नान् प्रष्टुं शक्नोमि किम्?' इत्यवदत्।

'पृच्छतु।'

'महाभारते द्रौपदीवस्त्रापहरणप्रसङ्गः। शरशय्यायां शयित्वा यः भीष्मः युधिष्ठिराय



धर्मस्वरूपम् उदबोधयत्, सः वस्त्रापहरणप्रसङ्गे तूष्णीम् आसीत् खलु, तस्य कः अर्थः? तेन कृतं समीचीनं वा? असमीचीनं वा?'

'देवल, केवलं भवता उक्ते एकस्मिन् प्रसङ्गे न, अपि तु बहुषु प्रसङ्गेषु भीष्मः तूष्णीम् आसीत्। सः दोषः एव, समीचीनं न। एतादृशः धर्मस्वरूपं कथं बोधयेत् इति भवतः प्रश्नः। धर्मं ज्ञातवान् चेदपि, त्यागी चेदपि, महान् मेधावी चेदपि स्वस्मिन् धर्मस्य अन्वयनावसरे एकदेशतया निश्चित्य तदनुसारं व्यवहृतवान् इति तस्य दोषः। अथापि सः वञ्चकः न। विधिः तेन द्वारा दोषं कारयति। अतः तेन बोधितः धर्मः स्वीकार्यश्चेदपि, तस्य दोषाः नानुसर्तव्याः। 'यान्यस्माकगं सुचरितानि तानि त्वयोपास्यानि नो इतराणि' इति श्रुतवान् खलु?'

'अपरः प्रश्नः - भीष्मस्य रामस्य च त्यागः पितृनिमित्तम् एव जातः। तयोः भीष्मस्य त्यागः रामस्य त्यागापेक्षया तीव्रः अस्ति। अथापि, पितृवाक्यपरिपालनार्थं रामः एव आदर्शप्रायः अस्ति, भीष्मः न, किमर्थम्?'

'भीष्मस्य त्यागेन अधर्मस्य प्रोत्साहनं प्राप्तम्, रामस्य त्यागेन धर्मस्य प्रोत्साहनं प्राप्तम्। भीष्मस्य दोषः विधिवशात् जातः। यदि सः दोषं न कुर्यात् तर्हि दुष्टानां नाशनं सम्पूर्णं न भवेत् इत्युक्त्वा भीष्मं वयं रक्षामः चेदपि, दोषस्तु दोष एव खलु! अतः पितृवाक्यपरिपालनार्थं भीष्मः आदर्शप्रायः न भवति।'

'अपरः प्रश्नः - विश्वामित्रः धनुर्विद्यायां निष्णातः चेदपि, स्वस्य यज्ञस्य विघ्नकर्त्रोः मारीचसुबाह्वोः निग्रहार्थं बालकयोः रामलक्ष्मणयोः आह्वानं कृतवान्। तत्र धर्मसौक्ष्म्यं किम्?'

'विश्वामित्रः ब्राह्मणः। सः शस्त्रं न गृह्णीयात्। तस्य यज्ञस्य रक्षणं क्षत्रियस्य कर्तव्यम्।'

'राजा यज्ञरक्षणे असमर्थश्चेत्?'

'तस्मिन् अनिवार्यप्रसङ्गे ब्राह्मणः अपि शस्त्रं ग्रहीतुं शक्नोति; सर्ववर्णीयाः ग्रहीतुं शक्नुवन्ति।'

'यज्ञरक्षणार्थम् अहम् आगमिष्यामि इति दशरथेन उक्ते सत्यपि विश्वामित्रः बालकौ रामलक्ष्मणौ एव किमर्थं नीतवान्?'

'विश्वामित्रस्य दूरदृष्टिः आसीत्। दशरथः मारीचसुबाह्वोः निग्रहं तु कुर्यात्। किन्तु तत् तत्रैव स्थगितं न भवति। तस्य परिणामाः अग्रे तीव्रतया भवन्ति। तान् सम्मुखीकर्तुं दशरथः समर्थः न इति विश्वामित्रः ज्ञातवान् आसीत्। ब्राह्मणस्य ईदृशी

Mahaparivrajaka

दूरदृष्टिः स्यात्।’

‘ब्राह्मणाः शस्त्रं ग्रहीतुं शक्नुवन्ति चेत् कृपेण द्रोणेन अश्वत्थाम्ना च गृहीतम् अपि समीचीनं वा?’

‘न। ते अधर्मपक्षं गत्वा युद्धम् अकुर्वन्। आत्मरक्षणार्थं, धर्मरक्षणे राजा असमर्थश्चेत् वा केवलं ब्राह्मणः शस्त्रं गृह्णीयात्।’

‘धर्माधर्मयोः निश्चयः कथं भवति?’

‘अयं जटिलः प्रश्नः, सुदीर्घं विमृश्य ज्ञातव्यम्। अथापि संक्षिप्ततया वदामि, शृणोतु। मोक्षः एव जीवनस्य लक्ष्यम्। स्वस्य वा इतरेषां वा, प्रत्यक्षतया वा परोक्षतया वा, अधुना वा अनन्तरं वा यत् कर्म मोक्षमार्गे विघ्नं जनयति सः अधर्मः; यत् कर्म साहाय्यमाचरति सः धर्मः। एतस्य वाक्यस्य विचारे भवान् यथा गभीरतया चिन्तनं करोति तथा स्फुटतया धर्मस्वरूपम् अवगच्छति।’

‘धर्माधर्मौ मोक्षस्य सापेक्षतया निश्चयं कृतवन्तः भवन्तः। कश्चित् मोक्षः एव सापेक्षः इति वदति चेत् किमुत्तरम्?’

‘मोक्षः सापेक्षः न इति अवगच्छतु, स्वस्य स्वरूपे स्वयं भवनम् एव मोक्षः, सः एव नित्यः निरतिशयश्च आनन्दः। अमुम् आनन्दमेव सर्वे वाञ्छन्ति इत्यतः इदमेव जीवनस्य ध्येयम्। अपि च स्वस्वरूपम् एकैकस्य एकैकं न; सर्वेषां स्वरूपम् एकमेव। अतः अयं सापेक्षः न, निरपेक्षः। यस्य कस्यापि, स्वस्वरूपात् च्युतौ जातायां सत्यामेव विषयानन्दः; सः सापेक्षः, आगन्तुकः, इच्छया प्राप्तुं शक्यः, श्रमेण प्राप्तुं शक्यः च। तस्य प्राप्त्या इच्छा इतोऽपि वर्धते, अन्ते दुःखे पर्यवस्यति। व्रणः भवति चेत् कण्डूयनेन सुखं प्राप्यते इति सत्यम्। अथापि अस्य सुखस्य निमित्तं कोऽपि विवेकवान् व्रणः भवतु इति, जातः व्रणः तथैव तिष्ठतु इति वा न इच्छति खलु! अतः कामेच्छा विवेकवतः लक्षणं न। अस्य व्यतिरिक्ततया आनन्दः सहजः, इच्छया श्रमेण च प्राप्यमाणः न। तस्य दुःखसम्बन्धः एव नास्ति।’

‘गुरुवर्याः! अहम् एतान् विचारान् समीचीनतया अध्येतुम् इच्छामि। कथम् अग्रे गच्छेयम्?’

‘रामायणं, महाभारतं, मन्वादिस्मृतीः च पठतु। संशये सति पद्मपादाचार्यं पृथ्वीधराचार्यं च पृच्छतु। पद्मपादाचार्यः द्वारकायां भूत्वा देशस्य पश्चिमभागे सञ्चरन् भवति। पृथ्वीधराचार्यः अत्रैव न भवति चेदपि अत्र आगच्छन् भवति। सम्यक् अध्ययनं करोतु।’



‘स्मृतीनाम् अध्ययनं कुर्वन् अस्मि। केषुचित् प्रसङ्गेषु तेषाम् अन्वयनं कष्टमिति भासते।’

‘तथा केचन प्रसङ्गाः भवन्ति। प्रस्तुतम् अपि तादृशप्रसङ्गाः जायमानाः सन्ति। विशेषप्रसङ्गेषु विशेषपरिहारः अपि वक्तव्यः एव। किन्तु यः परिहारं वदति सः गभीरतया शास्त्राध्ययनं कृतवान् स्यात्, अलूक्षः,[1] धर्मकामश्च स्यात्। सर्वान् अपि प्रेम्णा समबुद्ध्या च पश्येत्। देवल, एतत् मनसि निधाय अग्रे गच्छतु। भवतः श्रेयः भवतु।’[2]

यज्ञेश्वरदीक्षितवर्यस्य आनन्दस्य पारः एव नासीत्। पौत्रम् आलिङ्ग्य; ‘देवल, भवते अधुना परमेश्वरस्य आशीर्वादः जातः अस्ति’ इत्यवदत्। बहुवृद्धस्य तस्य बाल्यस्य स्मरणानि स्मृतिपथे आगतानि। नेत्राभ्यां जलमागतम्।

## १४. बदरीनाथं प्रति

तिसृषु दिक्षु धर्मपीठानां स्थापनमभवत्। इतःपरम् अवशिष्टं बदरीनाथम्। तत्र गन्तुं तोटकपृथ्वीधराभ्यां सह शङ्करस्य प्रयाणम् अनुवृत्तम्। मरुभूमयः, अरण्यानि, पर्वताः इत्येतेषां द्वारा तेषां मार्गः। तत्र तत्र मन्दिराणि, धर्मशालाः च विहाय तेषां स्थानानि गुहासु, जीर्णेषु मण्डपेषु च। ग्रामेषु बहुदूरवर्तिषु सत्सु पूर्वतनग्रामस्य शुष्करोटिकाः एव आहारः। आसेतु आहिमाचलं देशं शङ्करः अधुना तृतीयवारं सञ्चरन् अस्ति। परमेश्वरेण एतावत् सर्वं किमर्थं करणीयमभवत्? तस्य एतावति श्रमे किं कारणम्? धर्मरक्षणम्। वयं धर्मे यदि स्याम तर्हि तस्य एतावत् कष्टं न भवेत्। धर्मम् उल्लङ्घ्य वयं कीदृशं महापापं कृतवन्तः! धिक् अस्माकं कामान्, तमोगुणम्, सङ्कुचितदृष्टिं च! वयं धर्मं त्यक्त्वा गच्छन्तः स्मः इति अवगन्तुमपि नष्टसामर्थ्याः मूर्खाः जाताः स्मः खलु! अस्मान् वयं महान्तः बुद्धिमन्तः इति चिन्तितवन्तः खलु! कीदृशं दौर्भाग्यम्!

एकदा तोटकः शङ्करस्य वस्त्राणि प्रक्षालयितुं नीतवान्। रक्तचिह्नयुक्तानि वस्त्राणि दृष्ट्वा तस्य सम्भ्रान्तिः अभवत्। तानि स्वच्छीकृत्य प्रसारणानन्तरं, विषयमिमं पृथ्वीधरं सूचितवान्। कतिपयदिनानि शङ्करस्य विश्रान्तिः अपेक्षिता इति उभावपि

---

१. अक्रूरः

२. अयमेव देवलः अग्रे महान् स्मृतिकारः जातः।

MahaParivrajaka

निश्चितवन्तौ। तोटकः कतिचन औषधानि प्रायच्छत्, तथापि न्यूनं नाभवत्। गुरूणां परीक्षायां कृतायां, वातवृद्ध्या अपानवायोः अनुलोमः न जातः, मलावरोधेन भगन्धरव्याधिः जातः इति च ज्ञातम्। औषधार्थम् आवश्यकस्य घृतस्य अरण्ये सज्जीकरणं शक्यं नासीत्; ग्रामं प्रति गन्तव्यम्। पार्श्वस्थे ग्रामे प्राप्ते सत्येव प्रयाणं स्थगयित्वा चिकित्सार्थं तत्र उषितवन्तः। औषधसङ्ग्रहणार्थमेव महान् समयः आवश्यकः अभवत्। तावत्कालमपि शङ्करः वेदनां सोढ्वा शयानः आसीत्। औषधमूलानि आगतानि चेदपि औषधं सज्जीकर्तुम् आनुकूल्यं नास्ति। अथापि ग्रामस्थानां सहकारेण कालक्रमेण सिद्धमभवत्। केनचित् औषधमूलेन सज्जीकृते रसे तोटकः कार्पासतन्तून् आर्द्रीकृत्य गुदद्वारे जातेषु रन्ध्रेषु तान् स्थापयित्वा अन्तः नोदनं कृत्वा, गुरून् शायितवान्। कतिचन औषधानि गरीतुं दत्तवान्। प्रायः एकमासस्य चिकित्सानन्तरं शङ्करः पूर्णतया स्वस्थः अभवत्। उभौ शिष्यौ अपि निःश्वसितवन्तौ।

पृथ्वीधरः अवदत् – 'कस्यचन अभिचारक्रियया गुरुषु अयं रोगः दृष्टः इति भावितवान् आसम्' इति।

'नैव, पृथ्वीधरवर्य। एकस्य मूर्खब्राह्मणस्य शापः यथा भगवन्तं कृष्णं कम्पयितुं समर्थः नाभवत् तथा परमेश्वररूपान् गुरून् कस्यापि अभिचारक्रिया किमपि न करोति।'

'तर्हि किं प्रारब्धं वा?'

'भगवतः प्रारब्धमित्युक्ते कोऽर्थः!'

'तर्हि किं कारणम्?'

'इदं शरीरेण कृतस्य अधुनातनकर्मणः फलम्। कर्म अपि क्षेत्रस्य, फलमपि क्षेत्रस्य।'

'किं कर्म?'

'सञ्चरणम्। अधुना गुरूणां प्रायः ३१ वर्षाणि। अष्टमे वयसि एव गृहत्यागः; इत्युक्ते २३ वर्षाणां निरन्तरसञ्चारः। निरन्तरः वाक्छ्रमः। एतत् द्वयमपि वातवृद्धेः कारणम्। कारणं किमपि वा भवतु, स्वस्थाः अभवन् खलु!'

प्रयाणम् अनुवृत्तम्। मार्गे एकं दिनमपि तोटकः तस्मै घृतं दातुं न विस्मृतवान्। प्रयाणं समाप्तम्। त्रयः अपि बदरीं प्राप्तवन्तः। ब्रह्मदत्तस्य नेतृत्वे उत्तराम्नायपीठस्यापि स्थापनमभवत्। तोटकाचार्याः अत्रत्याः जगद्गुरवः अभवन्। केरलात् शङ्करेण प्रेषिताः युवब्राह्मणाः सपत्नीकाः बदरीनाथं प्रति आगत्य मन्दिरस्य दायित्वं निरूढवन्तः



Mahaparivrajaka

आसन्। पार्श्वग्रामेभ्यः तत्रागतानां ब्रह्मचारिणां कृते वेदाध्ययनमपि आरब्धमासीत्। ग्रामे नूतनः उत्साहः समुत्पन्नः आसीत्।

यथापूर्वम् अस्मिन् पर्याये अपि शङ्करस्य वासः व्यासगुहायामेव। एकस्मिन् अनध्ययनदिने सः तत्र एकाकी एव उपविष्टः अस्ति। सायङ्कालः जायमानः अस्ति। कश्चित् वृद्धमहात्मा गुहां प्राविशत्। काषायवस्त्रं रुद्राक्षमालां च धृतवान् अस्ति। अस्तं गच्छतः सूर्यस्य प्रकाशे तस्य ताम्रकमण्डलुः देदीप्यमानः अस्ति। शान्ते नेत्रे। शङ्करः झटिति उत्थाय साष्टाङ्गं नमस्कृत्य तम् आसने उपवेश्य करौ संयोज्य अतिष्ठत्। शङ्करम् उपवेष्टुम् उक्त्वा सः अवदत् : 'शङ्कर, भवता लिखितं प्रस्थानत्रयस्य भाष्यं विद्वांसः सर्वे बहु इष्टवन्तः इति अश्रौषम्। भवन्तं द्रष्टुम् आगतवान्। माण्डूक्योपनिषदः मम कारिकाणां कृते अपि भाष्यं लिखितवानिति।'

इदं वचनं शृण्वति सत्येव पुरस्तात् विद्यमानाः गौडपादाचार्याः एव इति ज्ञात्वा शङ्करः तेषां पादौ गृहीतवान्, बहुकालं यावत् न त्यक्तवान् एव। तेन एव उत्थापिते सति शङ्करः 'भगवन्, कस्य जन्मनः पुण्यं वा, मम भवतां दर्शनमभवत्। भवतां कारिकाणां कृते लिखितं भाष्यमिदम्, स्पृष्ट्वा प्रयच्छन्तु' इत्युक्त्वा ताडपत्राणां ग्रन्थिं तेषां पुरस्तात् स्थापितवान्। तां स्पृष्ट्वा तत्र संस्थाप्य गौडपादाः 'शङ्कर, अहम् अधिकं समयं न भवामि। एतावत् वदतु, आत्मजगतोः श्रुत्युक्तः दृष्टान्तः मृत् तथा घटः। मया दत्तः दृष्टान्तः रज्जुः सर्पश्च। अनयोः दृष्टान्तयोः समन्वयनं कथं कृतवान् इति वदतु' इत्यवदन्।

'भगवन्, व्यवहारयोग्यः घटः मृदं न त्यक्तवान्, किन्तु मृदि घटस्य व्यवहारः नास्ति। इदमेव संक्षिप्ततया वक्तव्यं चेत्, घटे मृत् अस्ति, मृदि घटः नास्ति। तद्वदेव दार्ष्टान्ते, जगति ब्रह्म अस्ति, किन्तु ब्रह्मणि जगत् नास्ति। अपि च आत्मा एव ब्रह्म। अतः जगति आत्मा अस्ति, आत्मनि जगत् नास्ति। अस्य वाक्यस्य पूर्वार्धमेव सर्वात्मभावः। अपि च उत्तरार्धवाक्यस्य अर्थः सुषुप्तौ साक्षात् अनुभववेद्यः भवति। अथापि जाग्रदवस्थायां जिज्ञासोः 'जगत् दृश्यमानमस्ति खलु? नास्तीत्युक्ते कोऽर्थः?' इति सन्देहः जायते। अस्य परिहारार्थं भवन्तः रज्जुसर्पदृष्टान्तं दत्तवन्तः। तस्य अन्वयनम् इत्थम् :

'जगत् दृश्यते' इत्युक्ते सति दृश्यमानं जगत् द्रष्टुः आत्मनः भिन्नम्' इति यदि भाव्यते तर्हि दोषाय। यतो हि आत्मनः भिन्नं किमपि नास्ति; दृश्यते खलु?' इति चेत् दृष्टं, रज्ज्वाः भिन्नरूपेण दृष्टः सर्पः इव मिथ्या, इत्युक्ते रज्ज्वाः मिथ्याज्ञानेन

सर्पदर्शनमिव आत्मनः मिथ्याज्ञानेन जगत् पश्यामः इत्यर्थः। अपि च दृश्यमानं तु सत्यमित्यतः भिन्नं न चेदपि भिन्नमिव दृश्यते' इति सम्यग्ज्ञानम्। इदं मिथ्याज्ञानं न। कथमित्युक्ते, रज्जुः एव सर्पवत् दृश्यते, सर्पवत् दृष्टा चेदपि सा रज्जुः एव' इति सम्यग्ज्ञानमेव। तद्वदेव जगत् स्वस्मात् भिन्नमिव दृश्यते चेदपि भिन्नं न – आत्मा एव।'

'इत्थं कार्यकारणसम्बन्धं गृहीत्वा जगतः द्वारा ब्रह्मणः निश्चयावसरे मृद्घटदृष्टान्तस्य अन्वयः। अपि च, 'तत् ब्रह्म अहमेव' इति ग्रहणावसरे, स्वस्मिन् कृतं जगतः अध्यासं दूरीकृत्य, एकत्वस्य बोधनावसरे भवद्भिः दत्तस्य रज्जुसर्पदृष्टान्तस्य अन्वयः।'

एतद्विवरणं श्रुत्वा गौडपादाचार्याणां महान् आनन्दः अभवत्। अन्ते अवदन् : 'शङ्कर, मम भावं भवान् समीचीनतया गृहीतवान्। तत् तथा भवतु, भवता करणीयेषु कार्येषु इतोऽप्येकम् अवशिष्टमस्ति। तत् किमिति शृणोतु। काश्मीरे विख्यातम् एकं सर्वज्ञपीठमस्ति। तत् शारदादेव्याः मन्दिरे अस्ति। तत्रत्याः दृप्ताः विद्वांसः पीठारोहणं कुर्वतां स्वीयवादैः विघ्नं जनयन्ति। तत् भवतः कार्यस्य कृते समीचीनम्। भवान् तत् आरोहति चेत्, भवतः भाष्याणां सम्मुखीकरणरूपं मूर्खसाहसम् अग्रे कोऽपि न करोति, तत्र गच्छतु। बहुभ्यः शताब्दीभ्यः तत् आरोढुं कोऽपि प्रयत्नं न कृतवान्। तान् वादिनः पराजित्य धर्मसंस्थापनकार्ये यशस्वी भवतु' इति आशीर्वादं कृत्वा कुत्रचित् गतवन्तः।

## १५. काश्मीरं प्रति

गौडपादाचार्याणां निर्गमनानन्तरं बहुसमयं यावत् तैः अन्ते उक्तं वाक्यं शङ्करः चिन्तयन् आसीत्। अनन्तरं गुहायाः बहिरागत्य, पृथ्वीधरं तोटकं च प्रति सर्वं प्रोक्तवान्। पृथ्वीधरः गौडपादानां वचनम् अनुमोदयन् अवदत् : 'गुरुवर्याः, भवतां भाष्येषु निष्कासनीयः एकः दोषः अपि नास्ति, योजनीयः एकः गुणः अपि नास्ति। अथापि कालान्तरे तेषां समग्रतां ग्रहीतुम् असमर्थाः एकदेशीयतया अवगत्य सिद्धान्तदूषणं कुर्युः इतीदम् असम्भवं न। भवन्तः सर्वज्ञपीठमारोहन्ति चेत् कोऽपि वा भवतु, तत् साहसं कर्तुं बिभेति। अवश्यमेव भवद्भिः काश्मीरं प्रति गन्तव्यम्।'

त्रयः अपि प्रस्थितवन्तः। मन्दिरं प्राप्य मातुः दर्शनं कृतवन्तः। सर्वज्ञपीठस्य विषये पृथ्वीधरेण विचारिते सति अध्यक्षः एकत्र विद्यमानं महत् द्वारम् उद्घाट्य



प्रादर्शयत्। रत्नभूषितं सिंहासनम्; दृष्टे सत्येव त्रयाणामपि नेत्राणि वेधितानि इव अभवन्। अध्यक्षः तस्य इतिहासं विस्तृततया प्रोक्तवान्।

पृथ्वीधरः अपृच्छत् : 'एतत् आरोढुं कश्चित् आगतवानस्ति, कथम् अग्रे सर्तव्यम्?'

'भवन्तः तु सामान्यतया पीठं द्रष्टुमागताः इति चिन्तितवान्। भवतां वचनेन महदाश्चर्यं सन्तोषश्च जातः। मम जीवनसमये तादृशः एकः प्रसङ्गः सम्भवति इत्युक्ते सः मम गर्वस्य विषयः। किन्तु झटित्येव व्यवस्थाकरणम् असाध्यम्। पण्डिताः सूचनीयाः। ते काश्मीरस्य विभिन्नेभ्यः प्रदेशेभ्यः आगच्छेयुः। तदर्थं न्यूनातिन्यूनं १५ दिनानि वा अपेक्ष्यन्ते। आरोढुम् इच्छुकानां परिचयं लिखित्वा प्रयच्छन्तु। विद्वद्भ्यः पत्राणि प्रेषयिष्यामि।'

पृथ्वीधरेण लिखित्वा दत्तस्य परिचयपत्रस्य लेखनशैली इत्थमासीत् :

'केरले जनिं प्राप्य, जननात् अष्टमे वर्षे संन्यासं स्वीकृत्य, षोडशे वर्षे सकल-शास्त्राणाम् अध्ययनसमाप्त्यनन्तरं दशोपनिषदां, ब्रह्मसूत्राणां, भगवद्गीतायाश्च असदृशानि भाष्याणि रचितवतां शङ्करभगवत्पादाचार्याणाम् अधुना त्रिंशत्तमं वर्षम्। भगवतां गौडपादाचार्याणां प्रेरणया सर्वज्ञपीठमारोढुं ते एतावता एव श्रीनगरं प्रति आगतवन्तः सन्ति। तैः सह वादं कर्तुं समर्थः विद्वान् अधुना एकोऽपि नास्ति, अग्रे जनिमपि न प्राप्स्यति इति मे विश्वासः। अथापि काश्मीरे तादृशाः केऽपि सन्ति चेत्, ते शीघ्रमेव अत्र आगच्छन्तु। शङ्कराचार्याः तान् सम्मुखीकर्तुं सज्जाः सन्ति।'

एतत् पत्रं पठित्वा प्रक्षुब्धाः विद्वांसः स्वस्वशिष्यसैन्येन सह निश्चिते समये शारदामन्दिरमागताः। अहो! तेषां कौशेयराङ्कवानि! तेषां वज्रवैडूर्यभूषितानि कटककुण्डलानि! तेषां वर्णरञ्जितानि उष्णीशानि, तिलकानि, उच्चैः हासश्च! स्वस्य प्रकोष्ठस्य वातायनद्वारा तान् दृष्टवति शङ्करे, पृथ्वीधरे, तोटके च जातः केवलं मन्दहासः।

परेद्यवि वादाः आरब्धाः। आदौ आगतः बौद्धः। सः शङ्करम् अपृच्छत् : 'अहं बौद्धः। भवान् सर्वज्ञश्चेत् मम सिद्धान्तः कः इति वदतु।'

'भवान् सर्वास्तित्ववादी वा? विज्ञानवादी वा? शून्यवादी वा? तदादौ वदतु। भवान् शून्यवादी चेत् भवान् अत्र नागतः एव, भवान् मया सह न भाषते एव, अत्र सर्वज्ञपीठमेव नास्ति, सर्वं शून्यम्। अतः भवता सह भाषणेन प्रयोजनमेव नास्ति। अतः भवान् कः इति वदतु।'

'अहं शून्यवादी न, सर्वास्तित्ववादी।'

'भवतः सिद्धान्ते पृथिव्यादिचतुर्भिः परमाणुभिः जातं, भवता भूतम् इति कथ्यमानं जगत् अस्ति। कारणरूपान् परमाणून् अहङ्कारं च भवान् भौतिकम् इति वदति। एतदुभयमपि मिलित्वा अध्यात्मिकः सर्वोऽपि व्यवहारः प्रवर्तते इति भवतः सिद्धान्तः। एतत् न समीचीनम्। यतो हि, परमाणवः अचेतनाः। ते शरीरं कर्तुम् न प्रभवन्ति। शरीरं विना अहङ्कारादयः कार्यं न कुर्वन्ति।'

'कार्यं कुर्वन्ति इति अहं वदामि। बीजात् क्रमशः अङ्कुरः, पर्णं, काण्डं, शाखा, पत्रं, पुष्पं, फलं च भवति। एतानि सर्वाणि अचेतनानि एव। तद्वदेव अविद्या, संस्कारः, विज्ञानं, जगत्, शरीरं, ज्ञानं, दुःखम् इत्येतेषु एकस्मात् अग्रिमं जायेत।'

'भवता कथ्यमानस्य कार्यकारणसम्बन्धस्य अङ्गीकरणम् असाध्यम्। यतो हि, भवान् क्षणभङ्गवादी। अतः पूर्वोत्तरक्षणानां हेतुफलभावं साधयितुं न शक्नोति। तदा हेतुभ्यः जगत् उत्पद्यते इति भवतः प्रतिज्ञा निरस्ता भवति। कारणस्य नाशेन विना कार्यं नोत्पद्यते इत्यपि भवान् वदति। आम्रफलस्य बीजनाशेन आम्रसस्यम् उत्पद्यते इति तद्विषये भवता दीयमानः दृष्टान्तः। आम्रबीजनाशस्य, तिन्त्रिणीबीजनाशस्य च भेदः नास्ति। उभयमपि अभावः एव। तथा चेत् तिन्त्रिणीबीजनाशेन आम्रसस्यमपि उत्पद्येत। किमर्थं नोत्पद्यते इति भवान् वदतु। अन्यथा इतः प्रतिगच्छतु' इति गर्जितवान् शङ्करः।

सः स्वस्य उष्णीशं हस्तेन गृहीत्वा झटित्येव प्रतिनिवृत्तः। अनन्तरम् आगतः, 'अहं विज्ञानवादी' इत्यवदत्।

'भवतः सिद्धान्तः कः इति भवान् वदति वा? मया वक्तव्यः वा?' इत्यवदत् शङ्करः।

सर्वास्तित्ववादिनः पराभवदर्शी सः विनयेन अवदत् : 'अहमेव वदामि, अनन्तरं भवान् मां प्रष्टुमर्हति। सर्वास्तित्ववादः बुद्धस्य सिद्धान्तः न। तेनोक्तः विज्ञानवादः; इत्युक्ते विषयज्ञानं विषयाकारेण अन्तर्भूतमस्ति। अतः विषयज्ञानात् भिन्नः एकः विषयः अस्तीति नास्ति वक्तव्यता। तर्हि विभिन्नज्ञानानां कारणं किम्? इति चेत्, अनादिकालात् मनसि सुप्तं वासनावैचित्र्यम्।'

'भवतः सिद्धान्तः न समीचीनः। विषयज्ञानं विषयाकारेण अन्तर्भूतं चेदपि विषयेण नान्तर्भूतम्। विषयः, विषयज्ञानात् भिन्नरूपेण बहिः अस्ति। कथमिति



पश्यतु; भवता दृश्यमानः घटः भवतः घटज्ञानात् भिन्नः न इति चेत्, भवतः पार्श्वे उपविष्टस्य अन्धस्य घटज्ञानं कथं भवेत्, वदतु।'

'स्पर्शेन भवेत्।'

'तर्हि, बहिः विद्यमानस्य घटरूपज्ञानस्य नयनं प्रमाणं, तस्यैव घटस्य स्पर्शज्ञानस्य त्वक् प्रमाणम् इत्यभवत्। एवम् एकस्मिन् एव वस्तुनि बहूनां लक्षणानां विद्यमानत्वम्, एकैकस्य लक्षणस्य विज्ञानस्यापि एकैकं प्रमाणम् अपेक्षितम् इति च स्पष्टम्। एवं प्रमाणद्वारा एव प्रमेयस्य ज्ञाने जायमाने सति, प्रमेयस्य ज्ञानं प्रमेयश्च एकमेव कथं भवेताम्? न भवेताम्।'

'स्वप्ने प्रमेयं विना विज्ञानं भवति खलु?'

'तथा न। स्वप्ने प्रमेयः बुद्ध्यनुसारी। जाग्रदवस्थायां बुद्धिः प्रमेयानुसारिणी। अतः स्वप्नसादृश्यं स्वीकृत्य जाग्रदवस्थायाः विषयः निराकर्तुं न शक्यते। स्वप्ने दृष्टः सुहृत् जाग्रत्प्रपञ्चे मृतः स्यात्, स्वप्ने मृतः जाग्रदवस्थायां जीवन् स्यात्। अपरः विचारः; स्वप्ने वासनानां द्रष्टा वासानाभ्यः भिन्नः एव स्यात्। वासनावस्तु, तत्सदृशं जाग्रतः पारमार्थिकं वस्तु च विभज्य जानन् विद्यमानः ज्ञाता नित्यः एव स्यात्। क्षणभङ्गवादिनः भवतः नित्यः ज्ञाता एव नास्ति खलु। अयं भवतः सिद्धान्ते विद्यमानः महान् दोषः।'

एतत् श्रुत्वा विज्ञानवादी सम्भ्रान्तः। 'अहं मम पूर्वजैः कृतमिव अकृत्वा, विवेकेन बौद्धवादं त्यक्त्वा वैदिकधर्मं प्रत्यागत्य भारते एव निवसामि वा? अथवा आग्रहेण तमेव दृढं गृहीत्वा भारतात् बहिः गच्छामि वा?' सः बौद्धपण्डितः तदा तु ततः प्रस्थितः इति सर्वे अपश्यन्। अनन्तरं सः कुत्र गतः इति कोऽपि न जानाति। बौद्धविदुषां पराभवस्य वार्ता नगरं परितः विद्यमानेषु ग्रामेषु अपि प्रसृता। जनाः समूहशः सभां प्रति आगताः। प्राङ्गणं पूर्णमभवत्। श्रोतारः वादान् अवगछन्ति स्म वा, न वा, वादिषु प्रतिनिवर्तमानेषु सत्सु करताडनं तु भवति स्म!

अनन्तरम् आगतः जैनः। तस्मिन् मते जीवः अजीवः इत्यादिपदार्थाः सन्ति। ते सर्वे सप्तभङ्गीनयः इति न्यायम् अनुसरन्ति; इत्युक्ते ते स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादव्यक्तः, स्यादस्ति च वक्तव्यश्च, स्यान्नास्ति च वक्तव्यश्च, स्यादस्ति च नास्ति च अवक्तव्यश्च। तं पण्डितं शङ्करः अपृच्छत् : 'एकस्यैव विषये समकालम् अस्ति तथा नास्ति इति विरुद्धधर्मौ न सम्भवतः। तथा स्यात् इति भासते चेदपि तत् संशयज्ञानं भवति, न तु सम्यग्ज्ञानम्। तथैव वक्तव्यत्वम्,

Maha Parivrajaka

अवक्तव्यत्वं चापि परस्परविरुद्धम्। तावदेव न, भवतः सिद्धान्ते जीवः शरीरपरिमाणवान्। तदपि न समीचीनम्। यतो हि, घटः इव जीवः अपि अनित्यः भवति।'

सः तूष्णीकः संवृत्तः। अनन्तरम् आगतः पाशुपतः। तस्य मते ईश्वरः जगतः निमित्तमात्रम्। प्रकृतिः उपादानम्। प्रकृतिपुरुषेश्वराःभिन्नाः। ईश्वरः पुरुषविशेषः। शङ्करः अस्मिन् मते दोषं प्रादर्शयत् : 'हीनमध्यमोत्तमानां प्राणीनां सृष्टिकर्ता ईश्वरः रागद्वेषवान् भवतीत्येव दोषः।'

सः अवदत् : 'अस्य भेदस्य कर्म कारणम् इति चेत्?'

'तदा कर्मेश्वरयोः प्रवर्त्यप्रवर्तकभावः अङ्गीकर्तव्यः। अयम् अन्योन्याश्रयदोषः। अपि च भवतां पुरुषः उदासीनः। अतः सः कर्म कर्तुं न शक्नोति। कर्मराहित्ये सति ईश्वरः तस्मै जन्म कथं दत्तवान्?'

अनन्तरं तार्किकस्य पर्यायः। सोऽपि निमित्तेश्वरस्य, प्रकृतिपुरुषेश्वरभेदस्य च वक्ता। पाशुपतवैशेषिकादीनामपि अस्य तर्कः एव आधारः। तम् उद्दिश्य शङ्करः अवदत् : 'भवतः मते प्रकृतिं स्वाधीनां कृत्वा जगतः सृष्टिक्रियायाम् ईश्वरस्य शरीरं स्यात्। सृष्टेः अनन्तरमेव शरीरं जायते। अतः भवतः ईश्वरः जगतः निमित्तं न भवेत्। तावदेव न। सृष्टेः पूर्वं केवलं तस्य एव शरीरम् अस्तीति कल्प्यते चेत् तस्य भोगः आपतति। तदा तस्य, पुरुषस्य च भेदः न भवति।'

इतोऽपि बहवः सिद्धान्तिनः शङ्करस्य आक्षेपान् सम्मुखीकर्तुम् असमर्थाः सन्तः प्रतिनिवृत्ताः। अन्ते सम्मुखमागतः साङ्ख्यः। ब्रह्म जगदुपादानम् इति वैदिक-सिद्धान्तस्य विरुद्धं सः स्वमतं प्रत्यपादयत् : 'घटादिजडवस्तूनां मृदादिजडद्रव्याणि एव कारणम्। तथैव जगतः जडप्रधानम् उपादानम्।'

'चेतनाधिष्ठानराहित्ये प्रधाने प्रवृत्तिः न स्यात्। अतः स्वतन्त्रतया प्रधानं जगत्कारणं न भवेत्।'

'जलप्रवाहप्रवृत्तौ किमपि चेतनं नास्ति खलु?'

'जलस्य प्रवाहार्थं निम्नता स्यात्। मनुष्याः निम्नतां कृत्वा कृषिक्षेत्रं प्रति जलं वाहयन्ति इति दृष्टवान् खलु?'

'चेतनाधिष्ठानं स्यादेव इति अनुरोधः क्रियते चेत्, पुरुषः अस्त्येव। सः एव प्रवर्तकः भवेत्।'

'भवतां पुरुषः उदासीनः। अतः प्रवर्तकोऽपि न, निवर्तकोऽपि न।'

'उदासीनः अयस्कान्तः अयसः आणीनां प्रवर्तकः अस्ति खलु?'



'इदं प्रवर्तकत्वं सान्निध्येन जायते। इदम् अङ्गीकृतं चेत्, प्रधानस्य पुरुषसान्निध्यं नित्यमित्यतः सृष्टिरपि नित्या स्यात्; तदा लयस्य अवसरः एव नास्ति।'

'भवतः सिद्धान्ते अपि ईश्वरः उदासीनः एव खलु? तत्र किं वदति?'

'वदामि, शृणोतु। श्रुतिप्रमाणसिद्धः ईश्वरः स्वस्वरूपम् आश्रित्य उदासीनः। मायामाश्रित्य प्रवर्तकः।'

'ईश्वरेण सह मायायाः अपि वक्ता भवान् वयमिव द्वैती अभवत् खलु?'

'भोः, माया ईश्वरात् भिन्ना न; सा तस्य शक्तिरेव।'

प्रधानमल्लस्य साङ्ख्यस्य निबर्हणेन वादाः समाप्ताः। समवेतः जनस्तोमः उच्चकण्ठेन शङ्करस्य शारदादेव्याश्च जयकारान् अकरोत्। अध्यक्षः आगत्य शङ्करं सावधानतया सर्वज्ञपीठनिकटं नीतवान्। किमितः परं, सर्वज्ञपीठस्य प्रथमसोपाने शङ्करेण स्वस्य दक्षिणपादः निधातव्यः, तावता, अन्तिमे सोपाने झटित्येव दृष्टा एका देवता करेण तं निवार्य उच्चैः अवदत् :

'तिष्ठतु, तिष्ठतु। भवान् आरोहणं कर्तुं न शक्नोति। अहम् अस्य पीठस्य अधिदेवता। अत्र यः उपविशति सः केवलं विद्वद्वरिष्ठश्चेत् न पर्याप्तम्, सः परिशुद्धः अपि स्यात्। भवान् परिशुद्धः न। संन्यासी सन्नपि परकायप्रवेशं कृत्वा स्त्रीसङ्गं कृतवान्। भवतः अत्र स्थानं नास्ति।'

'अम्ब, स्त्रीसङ्गं गृहस्थः अकरोत्? उत संन्यासी?'

'सङ्गं कृतवान् गृहस्थश्चेदपि तस्य अन्तः संन्यासी एव आसीत् खलु?'

'लिङ्गं, वर्णः, आश्रमश्च स्थूलशरीरस्य, न तु सूक्ष्मशरीरस्य। एकमेव सूक्ष्मशरीरम् कर्मानुगुणं विभिन्नानि शरीराणि प्राप्नोति इति शास्त्रं वदति।'

'कर्मानुगुणं संस्कारः। सः जायते बुद्धौ। संन्याससंस्कारयुतायाः बुद्धेः गृहस्थशरीरे प्रवेशः दोषः न वा?'

'अम्ब, एकस्मिन् पात्रे विद्यमानं शुद्धं जलं, अपरस्मिन् अशुद्धे पात्रे स्रावयामः चेत्, शुद्धजलम् अशुद्धं भवेत्। मया, केनापि संस्कारेण रहिते प्रेते प्रवेशः कृतः इति स्मरतु अम्ब। अतः नाहं भ्रष्टः। अपि च सूक्ष्मशरीरस्य स्थूलशरीरेण सह सम्बन्धः एव नास्ति। अतः जनकेन सह वादकरणावसरे एव तस्य शरीरे प्रविष्टा सुलभा भ्रष्टा नाभवत्। गुरुपत्नीम् इन्द्रात् रक्षितुं तस्यां प्रविष्टः उत्तङ्कः भ्रष्टः नाभवत्। तावदेव न। सृष्टिकार्यं निर्वोढुम् ईश्वरे जीवात्मनि प्रविष्टे सति सः भ्रष्टः न भवति। एवं स्थिते, प्रेते प्रविष्टः अहं भ्रष्टः अभवं वा?'

'स्त्रीसङ्गसंस्कारः बुद्धौ भवति। तया बुद्ध्या सह इदं संन्यासिशरीरं प्रति प्रत्यागतवान् इत्यतः साङ्कर्यं जातम्।'

'अम्ब, यदि सः संस्कारः एव अभविष्यत्, तर्हि अहं तत्रैव अभविष्यम्। प्रतिनिवर्तनमेव न अकरिष्यम्। प्रत्यावर्तनानन्तरम् उभयभारतीदेवी तया पृष्टस्य प्रश्नस्य उत्तरार्थं यदि आग्रहम् अकरिष्यत्, अहं यदि उत्तरम् अदास्यम्, तर्हि तदा प्रायः तद्विषये भाषितमिति दोषः मम अभविष्यत्। सा महती, दूरदृष्टियुक्ता। उत्तरार्थं सा अनुरोधं नाकरोत्, अहमेव स्वयं किमपि नावदम्। अम्ब, पुनश्च, यदि सः संस्कारः मयि अभविष्यत्, भवत्याः दर्शनम् अपि नाभविष्यत्!'

एतावत् सम्भाषणानन्तरं देवता हसित्वा अवदत् : 'वत्स, शङ्कर, भवान् निर्दोषः इति, धर्मोद्धारार्थम् अवतीर्णः इति च मया अज्ञातौ विचारौ न। सर्वप्रयत्नेन मण्डनेन सह जयप्राप्तिः धर्मसंस्थापनार्थम् आवश्यकी आसीत्। भवतः सर्वज्ञत्वं प्रकाशमानेतुं, कामप्रश्नं प्रष्टुम् उभयभारतीम्, परकायप्रवेशं कर्तुं भवन्तं च विधिः एव प्रेरितवान्। एतत् लोकः जानातु इति उद्देशेन अहम् एतं वादं कृतवती। भवान् अस्मिन् वादे जितवान्। आरोहणं कृत्वा पीठे उपविशतु।'

शङ्करः सोपानानि एकैकशः आरूढवान्। सर्वज्ञपीठे उपाविशत्। करताडनं, घण्टाः, जयघण्टाः, पटहाः, आनद्धानि, सुषिराणि, शङ्खाः, जनस्तोमस्य जयघोषाश्च गगनं भिन्दन्तः अनदन्। शङ्करस्य शिरसः उपरि जगदम्बायाः शारदादेव्याः वरदहस्तः आसीत्।

'अहो! अहो! अहो! इदम् अद्भुतं कोऽपि कदापि न दृष्टवान्। कीदृशाः भाग्यशालिनः वयम्!' इत्यवदन् जनाः। शङ्करस्य शिरसः हस्ते निष्कासिते सत्येव शारदा अन्तर्हिता अभवत्। अनन्तरं शङ्करः एकक्षणमपि तत्र अतिष्ठन्, झटित्येव सोपानेषु अवरोहणं कुर्वन् पृथ्वीधरतोटकाभ्यां सह नगरात् पूर्वस्यां दिशि प्रस्थितः।

## १६. कैलासं प्रति

मार्गे एकः ग्रामः। तत्र प्रायः शतं गृहाणि स्युः। वस्तुम् एकं देवमन्दिरम् अस्ति। समीपे एव शुद्धजलस्य एका निर्झरिणी प्रवहति। वासार्थं भिक्षार्थं च सौकर्यमस्ति। तत्र त्रयः अपि उषितवन्तः। द्वित्राणां दिनानां विश्रान्तिः अभवत्। एकस्यां रात्रौ अर्चकः सायङ्कालपूजाम् समाप्य, पूर्णायां रात्रौ प्रज्वलेताम् इति द्वयोः बृहद्दीपयोः



तैलं संस्थाप्य प्रस्थितः। शङ्करः उभावपि शिष्यौ आहूय अवदत् : 'उपविशताम्, भवद्भ्यां सह भाषणीयाः बहवः विचाराः सन्ति। सावधानतया शृणुताम्। मोक्षसाधनार्थं समाजे शान्तिः, संयमश्च नितराम् अपेक्ष्यते इति बहुवारम् उक्तम्। किन्तु अधुना शान्तिभङ्गः जायमानः अस्ति। आदौ बौद्धैः, अनन्तरं म्लेच्छानाम् आक्रमणेन। आदौ बौद्धानां विचारं पश्यताम्। १२-१३ शताब्दीभ्यः पूर्वं बुद्धः किमपि अवदत्। तत् किमिति स्पष्टतया ज्ञातुं मार्गः नास्ति। तस्य शिष्यैः कथ्यमानमेव तेनोक्तमिति भावनीयमस्ति। पुनश्च, तस्य शिष्याः तत् विभिन्नरूपेण प्रतिपादयन्तः सन्ति। तत् स्वीकृत्य प्रत्येकमपि असमीचीनमिति दर्शितम् अभवत्। किन्तु सः, वेदस्य वर्णाश्रमधर्मस्य च विरोधी आसीत् इत्येतावत् तु स्पष्टम्। अनेन दोषेण तस्य अनुयायिनः समाजद्रोहिणः अभवन्। आक्रमणकारेभ्यः निरन्तरं साहाय्यम् अकुर्वन्। भगवतः कृपया पुष्यमित्रादयः राजानः एतावता एव पूर्णतया तेषां दमनं कृतवन्तः। अथापि सुगतस्य शान्त्यहिंसानां वर्णरञ्जितैः वचनैः मुग्धाः केचन पण्डितम्मन्याः, सामान्यजनाश्च इतोऽपि सन्ति। तेषां परिष्करणकार्यम् अवशिष्टमस्ति। किन्तु मम भयमित्युक्ते सुगतात् स्फूर्तिं प्राप्य, बहवः इतःपरमपि एतादृशान् विविधान् भ्रमान् प्रसारयेयुः। साङ्ख्यादयः इव वैदिकपरिधौ भूत्वा एव तत् कार्यं कुर्वन्ति चेदपि तावती हानिः नास्ति; समाजद्रोहिणः न जायन्ते। जैनाः इव वैदिकसम्प्रदायस्य विरुद्धम् अस्थित्वा, स्वेषां कल्पनाः कुर्वन्ति चेदपि चिन्ता नास्ति। वैदिकपरिधिं विरुद्ध्यन्ति चेत् महती हानिः।'

मध्ये पृथ्वीधरः अवदत् : 'सुगतस्य अनुयायिनां परिष्करणकार्ये मम एकं कष्टं दृश्यते।'

'किं कष्टम्?'

'आत्मस्वरूपे जगत् नास्ति इति श्रुत्युक्तेः, शून्यवादिनां विज्ञानवादिनां च मध्ये महदन्तरम् अस्ति इति सत्यम्। अथापि, अन्तरं ग्रहीतुं सामर्थ्यरहिताः सामान्याः, सुगतस्य सिद्धान्तः श्रुतिविरुद्धः न इति विश्वसन्तः तत्रैव अनुवर्तेरन्। एतत् निवारयितुं, सगुणपरमात्मोपासनाम् एव जनानां पुरतः स्थापयामः चेत् कथम्?'

'तत् न सङ्गच्छते, कथमिति पश्यतु। निर्गुणपरमात्मा अपि श्रुतौ उक्तः इति तेषाम् अवधाने आगते सति, तानि विरुद्धवचनानि इति अवगत्य जनानां श्रुतौ विश्वासः नष्टः भवेत्। तदा ते सुगतस्य इतोऽपि समीपस्थाः भवेयुः। अतः तथा करणं न समीचीनम्। अस्माभिः समग्रवेदः एव जनानां पुरस्तात् स्थापनीयः। अधिकारानुसारं

Mahaparivrajaka

ते चयनं कुर्युः इत्यपि वक्तव्यम्। पुराणेतिहासाः तदेव कुर्वन्ति।'

'अपरः प्रश्नः – बौद्धाः सङ्घं स्थापितवन्तः इत्यनेन बहुशीघ्रं बौद्धमतं प्रसृतम्। तथैव अस्माकं कार्यसाधनाय बौद्धाः इव वयमपि सङ्घं स्थापयामः चेत् कथम्?'

'सङ्घे स्थापिते सति समाजः सङ्घटितः न भवति। विद्यमानेषु समूहेषु इतोऽप्येकस्य समूहस्य योजनं भवति, तावदेव। बौद्धेषु एव अधुना त्रिचतुराः सङ्घाः जाताः सन्ति खलु! जैनेष्वपि जाताः खलु! मनुष्यैः स्थाप्यमानानां सङ्घानां कालान्तरे नाशः अपि निश्चितः। यज्जातं तेन मर्तव्यम् – जनिं प्राप्तं सर्वं म्रियते एव। स्वस्य योगक्षेमं वोढुमपि असमर्थाः पुरुषाः समाजस्य योगक्षेमार्थं कां व्यवस्थां कुर्युः! समग्रसमाजस्य योगक्षेमार्थं परमात्मा एव एकाम् अमर्त्यव्यवस्थाम् आरचितवान् अस्ति। सा एव वर्णाश्रमव्यवस्था। अनादिकालात् वैदिकपरम्परा जीवति इत्येव, इयं परमात्मनः व्यवस्था इत्यत्र प्रमाणम्।'

'वर्णाश्रमधर्मः एव अधुना क्षीयमाणः अस्ति खलु?'

'क्षतिः स्यात्, किन्तु न म्रियते। स्वकीयानुष्ठानेन, स्वाध्यायप्रवचनाभ्यां च तस्य ह्रासस्य अवरोधः एव ब्राह्मणस्य धर्मः, तपः च। समाजः मार्गदर्शनार्थं ब्राह्मणं प्रतीक्षते। अतः आदौ ब्राह्मणस्य रक्षणं भवेत्। तस्मिन् त्यागः, विद्या, कष्टसहिष्णुता, दूरदृष्टिः, धैर्यं, समग्रसमाजविचारे मैत्रीभावश्च भवेत्। एतादृशानां ब्राह्मणानां सर्जनं भवतां ध्येयं भवतु।'

'सद्यः अस्माभिः कर्तव्यं किम्? कथम् अग्रे गन्तव्यम्?'

'सद्यः सम्मुखीकर्तव्यं मतपरिवर्तनम्। केन कारणेन ये केऽपि स्वमतानि प्रति वैदिकानां परिवर्तनं कर्तुं शक्ताः इति आदौ अवगन्तव्यम्। समाजस्य बहुभागः मुग्धः। कुटिलबुद्धीनां वञ्चनयुक्तवचनानां कृते सः सुखेन बलिः जायते। वेदनिन्दकानां सङ्ख्यावृद्धौ इदं कारणम्। बौद्धानां वञ्चनायाः एकं दृष्टान्तं पश्यताम्; एकस्याः भित्तेः पुरस्तात् मुग्धान् उपवेश्य, ते यत्किमपि प्रष्टुं शक्नुवन्ति इति, बुद्धः उत्तरं ददातीत्यपि वदन्ति। तैः किमपि पृष्टे सति पृष्ठतः उपविष्टः कश्चित् उत्तरं ददाति। तेषु विश्वासं जनयित्वा बौद्धरूपेण कर्तुम् एतावत् पर्याप्तम्! पुनश्च, केरले क्रैस्तैः क्रियमाणां वञ्चनां भवन्तः एव जानन्ति। किन्तु मुग्धः अपि, सात्त्विकब्राह्मणस्य सम्पर्कमात्रे अस्ति चेदपि अस्याः वञ्चनायाः बलिः न भवति। अतः ब्राह्मणः मुग्धजनान् कदापि दूरे न स्थापयेत्। पुनः अमुग्धाः बौद्धमतेन किमर्थम् आक्रान्ताः अभवन्? वैदिकानुष्ठाने आलस्यम् अथवा उपेक्षा कारणम्। आमिषः अपि कारणं स्यात्। पुनः केचन



बुद्धिमन्तः अपि ग्रस्ताः अभवन् इत्यत्र किं कारणम्? वैदिकसिद्धान्तं ते समीचीनतया नावगतवन्तः। एतेषां विचारे तत्त्वस्य समीचीनतया बोधनमेव परिहारः। अमुग्धेषु कर्मासक्तिः वर्धनीया। मुग्धैः सह प्रेममयः सम्पर्कः भवति चेदपि पर्याप्तम्।'

'यवनैः क्रियमाणे मतपरिवर्तने वञ्चना नास्ति, क्रौर्यमस्ति। तत् कथं सम्मुखी-कर्तव्यम्?'

'अस्यां समस्यायां भागद्वयमस्ति। आदिमः क्रौर्यस्य अवरोधः। इदं कार्यं प्रधानतया प्रत्यक्षतया च करणीयं राजभिः; प्रजानां पात्रं गौणं परोक्षं च। साक्षात् ताः एव किमपि कर्तुं न शक्नुवन्ति। किन्तु राज्ञां कृते अपि तेषां कर्तव्ये मार्गदर्शनकरणं ब्राह्मणस्य कर्तव्यम्। कौटिल्यः अस्य दृष्टान्तः। क्रौर्यं सम्मुखीकर्तुं राजा नास्ति चेत्, समर्थः ब्राह्मणः शस्त्रं गृहीत्वा अग्रे सर्तुं शक्नोति। पुष्यमित्रः अस्य दृष्टान्तः। अयं यदा एकच्छत्राधिपतिः अभवत्, अनन्तरं योगशास्त्रप्रणेता पतञ्जलिः तेन द्वारा अश्वमेधयागं कारितवान् इति वयं श्रुतवन्तः। किन्तु, एवं शस्त्रधारणं ब्राह्मणस्य आपद्धर्मः इति स्मर्तव्यम्।'

'अस्याः समस्यायाः अपरः भागः कः?'

'क्रौर्येण परिवृत्तानां प्रत्यानयनम्। क्रूरः म्लेच्छराजः शाश्वतरूपेण तस्मिन् एव स्थाने न भवति। अतः योग्यसमयस्य प्रतीक्षां कृत्वा, तस्य भयेन परिवृत्ताः प्रत्यानेतव्याः। प्रत्यागन्तुं ते इच्छन्ति चेदपि, शास्त्रे श्रद्धावन्तः इतरे विघ्नं जनयन्ति। इयं जटिला समस्या। अतः, अस्य परिहारवक्तारः उद्दामपाण्डित्यवन्तः, परमसात्त्विकाः, इतरे जनाः यान् उल्लङ्घितुं भयम् अनुभवेयुः तथा तेजस्विनः च अवश्यमेव भवेयुः। ते पतितानाम् उचितं प्रायश्चित्तं कारयित्वा, समाजे पुनः योजयेयुः। कस्य अनाचारस्य किं, कियत् च प्रायश्चित्तम्? पतितावस्थायां कति व्यक्तिपरम्पराः यावत् पुनः परिवर्तनं भवितुमर्हति? व्यक्तिपरम्परासु विद्यमानाः म्लेच्छेभ्यः जनिं प्राप्तवन्तः उत अन्यस्मात् पतितात्? इति सर्वं विचिन्त्य पुनः परिवर्तनम् अनुष्ठातव्यम्। तीक्ष्णया अपि लौकिकबुद्ध्या एतेषां प्रश्नानाम् उत्तरदानम् असाध्यम्।'

'केरलस्य क्रैस्ताः इव वञ्चनया एव परिवृत्तानां विचारे अवधातव्याः अंशाः के?'

'उपर्युक्तं सर्वम् एतेषामपि अन्वितं भवति। तेन सह तेषाम् अधिकारानुसारं स्वल्पः शास्त्रविषयः अपि बोधनीयः। दोषस्य स्वभावः, परिमाणं, जातस्य दोषस्य सन्दर्भः इत्येतान् अवलम्ब्य शास्त्रं दोषं चर्चयति। वञ्चनान्तर्भूतत्वेन जातः दोषः

अत्यल्पः इति तेषाम् अवबोधनं करणीयम्। एतेन वयं पतिताः जाताः इति भ्रान्तिः नश्यति। पृथ्वीधरवर्य, अस्मिन् सन्दर्भे सौराष्ट्रस्य देवलं मनसि स्थापयतु। तस्मिन् दिने तेन चर्चिताः विचाराः स्मर्यन्ते खलु? तस्य विकासः यथा स्यात् तथा पश्यतु। तेन अग्रे महाकार्याणि साधितानि भवेयुः।'

अपरस्मिन् दिने तोटकः शयनं कृतवानस्ति। पृथ्वीधरेण सह भाषमाणः शङ्करः अवदत् :

'पृथ्वीधरवर्य, भवतः दायित्वं महत्। परमपूज्यानां गोविन्दभगवत्पादानां शिष्याः, एतेषां शिष्याणां शिष्याश्च संन्यासिनः अधुना देशे पर्याप्तप्रमाणेन सन्ति। तान् सर्वान् उपयुज्य, सर्वान् संन्यासिनः एकसूत्रे समानीय मार्गदर्शनं करणीयम्। अधुना चतसृषु दिक्षु स्थापितानाम् आम्नायपीठानां जगद्गुरवः स्वस्वपरिधौ कार्यं कुर्वन्तः भवन्ति। देशः बहुविस्तृतः इति कारणेन एते चत्वारः अपि काले काले एकत्र मिलित्वा समालोचनं कर्तुं न प्रभवन्ति। अतः अस्मिन् कार्ये भवन्तः कुम्भमेलाम् आधाररूपेण कुर्युः। तेषां तेषां संस्कारसामर्थ्यानाम् अनुसारं संन्यासिनः अरण्येषु, पर्वतप्रदेशेषु, नदीतीरेषु, समुद्रतीरेषु, ग्रामेषु, पत्तनेषु च सञ्चरन्तः समग्रराष्ट्रं वैदिकपरम्परायां स्थापयेयुः। एकैकस्यापि समूहस्य अधिकारः विभिन्नः। अतः तेभ्यः बोधनीयाः विचाराः विभिन्नाः, बोधनरीतिः च विभिन्ना एव भवति। अतः तत्तद्योग्यतावन्तः संन्यासिनः तत्तत्स्थलेषु यथा भवेयुः तथा व्यवस्था भवेत्। कुम्भमेलायां संन्यासिनां समावेशे जाते सति पूर्वमीमांसा, शारीरकमीमांसा, पुराणेतिहासस्मृतयः, तत्काले धर्मस्य परिस्थितिः इत्येतेषां चर्चा भवेत्। परिस्थितिः सर्वदापि समानतया एव न भवति। सन्दर्भाः यावन्तः परिवृत्ताश्चेदपि अयं वैदिकाधारः परिवृत्तः यथा न स्यात् तथा सन्दर्भानुसारं एतासु मेलासु जनेभ्यः मार्गदर्शनं निरन्तरं भवेत्। मया कथ्यमानम् अवगतं वा? प्रष्टव्यं किमपि अस्ति वा?'

'भगवन्, मम तु, परितः अन्धकारः एव दृश्यते। अस्माकम् इदं कार्यं सफलं भवेद्वा?'

'पृथ्वीधरवर्य, स्मरतु। कार्यं कर्तुम् उद्युक्तस्य आत्मविश्वासः नास्ति चेत् सः किं कार्यं कुर्यात्? उत्साहं वहतु। अस्माकं साहाय्यकर्तारः केऽपि न सन्तीति चिन्तां न करोतु। क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे – अत्र सत्त्वमित्युक्ते उत्साहः एव। उत्साहः अस्ति चेत् अन्यत् उपकरणमेव नापेक्ष्यते। भवताम् उत्साहं दृष्ट्वा एव अन्ये अपि उत्साहवन्तः भवन्ति। अपि च फलाकांक्षया यः कार्यं करोति सः



कृपणः। फलं कर्तुः अधीनं न, परमेश्वराधीनम्। यतो हि फलं देशकालनिमित्तानि वाञ्छति। देशकालनिमित्तानि कर्तुः अधीनानि न, ईश्वराधीनानि। अतः उत्साहेन कार्यकरणमेव अस्माकं ध्येयं स्यात्। फलं वाञ्छामः चेत् तस्य भोगार्थं जन्मान्तरम् प्राप्तव्यम्। अतः यः पुनर्जन्म न इच्छति, सः फलं न इच्छेत्। कृतं तपः व्यर्थं तु न भवति। फलम् अस्माभिः प्रतीक्षिते समये – इत्युक्ते अस्माकं जीवितावधौ एव न प्राप्यते चेदपि, तपसः फलं तु अस्त्येव। चिरात् भवतु नाम। धर्मस्य नाशः तु न भवति। एकवारम् उत्कर्षः, एकवारम् अपकर्षः च भवति चेदपि युगान्तरेभ्यः अपि धर्मः जीवन् एव अस्ति खलु? अधुना अस्माकं ज्ञानानुसारं ग्रीकाः, हूणाः, कुशानाः, अरब्बाश्च क्रूराणि आक्रमणानि कृतवन्तः चेदपि धर्मः अस्ति खलु? अतः वयं धर्मं रक्षामः इति अहङ्कारः न समीचीनः। अग्रे अपि सः जीवत्येव। किन्तु स्वाध्यायप्रवचनानां निरन्तराचरणमेव अस्माकं तपः। अस्य तपसः विशेषावसरः प्राप्तः इत्यनेन धर्मस्य सङ्कटे प्राप्ते अस्मिन् सन्दर्भे जन्मप्राप्तिः अस्माकं सौभाग्यम् इति मत्वा अस्य दैविककार्यस्य आधाररूपेण भवता स्थातव्यम् इति मम महाभिलाषः।'

'भगवन्, भवताम् अनुग्रहः, मार्गदर्शनं च मह्यं भवतु। भवद्भिः दत्तं दायित्वं निर्वहामि।'

'मम आशीर्वादः भवतः उपरि पूर्णतया अस्ति। इतःपरं काले काले मार्गदर्शनं भवति भगवतः द्वारा। तस्मिन् श्रद्धां निधाय, क्रियमाणं कर्म तस्मै समर्पयन् अग्रे सरतु, यशस्वी भवतु। विलम्बः अभवत्, गत्वा शयनं करोतु' इत्यवदत्। पृथ्वीधरः नमस्कृतवान्। भगवान् शङ्करः स्वस्य दक्षिणकरं बहुसमयं यावत् तस्य शिरसि निहितवान् आसीत्।

पृथ्वीधरः तस्यां रात्रौ शयनं कृतवान् चेदपि परेद्यवि ब्राह्मीमुहूर्तादपि पूर्वमेव उत्थितवान्। तेन शब्देन जागरितः तोटकः अपि उत्थितः। उभावपि शौचम् समाप्य, निर्झरिण्यां स्नात्वा प्रत्यागच्छन्तौ आस्ताम्। सूर्योदयार्थम् इतोऽपि बहुसमयः आसीत्। मार्गे पृथ्वीधरः अवदत् : 'तोटकवर्य, मम महत् भयं जायते।'

'किं भाषते आचार्य! भवतः भयमित्युक्ते कोऽर्थः! किमर्थं भयम्?'

'गुरूणां सान्निध्यभाग्यम् इतःपरं स्वल्पकालमात्रम् इति भासते।'

'भगवन्, भगवन्, किं वदति! किञ्चित् स्पष्टतया उच्यताम् आचार्य!'

'ह्यस्तनरात्रौ तेषां भाषणस्य शैलीं दृष्टवतः एव मम इदं भयं जातम्। प्रातः उत्थानात् पूर्वम् एकं स्वप्नम् अपश्यम्। गुरवः कुत्रचित् दूरे पर्वतम् आरुह्य गच्छन्तः

Maha Parivrajaka

आसन्। आवाम् उभावपि धावन्तौ तान् अनुसृतवन्तौ। अग्रिमक्षणे ते न दृष्टाः एव। तस्मात् भयादेव उत्थितः।'

'तथा वा, भवान् आक्रोशनं कृतवान्, तत् श्रुत्वा एव अहं जागरितः।'

'इतःपरम् क्षणमपि आवाभ्यां तान् त्यक्त्वा न भाव्यम्। गुरूणाम् उत्थानसमयः अभवत्। गच्छाव, आगच्छतु।'

उभावपि शीघ्रं शीघ्रं चलित्वा गुरूणां प्रकोष्ठं प्रविष्टवन्तौ। तत्र गुरवः नासन्। हृदये कम्पिते। उभावपि निर्झरिणीं प्रति धावितवन्तौ। 'गुरुवर्याः, गुरुवर्याः' इति उच्चैः बहुधा आहूतवन्तौ। सर्वत्रापि अन्विष्टवन्तौ। कुत्रापि न सन्ति। मन्दिरस्य अर्चकगृहं गत्वा तम् उत्थापितवन्तौ। सः अन्यम् उत्थापितवान्। ग्रामस्य सर्वे जनाः उत्थिताः। गुरवः केनापि न प्राप्ताः। पृथ्वीधरतोटकौ उन्मत्तौ इव अभवताम्। ग्रामस्य द्वे एव एकपद्यौ आस्ताम्। एका काश्मीरात् आगता, अपरा तद्विरुद्धा। ताभ्यां विरुद्धदिशि धावितवन्तौ। पर्वतप्रदेशः। कियत् दूरं धावितुं शक्यम्! चलितुम् आरब्धवन्तौ। मार्गे सर्वत्र 'द्वात्रिंशद्वर्षीयः यतिः दृष्टः किम्?' इति पृच्छन्तौ आस्ताम्। केनापि न दृष्टः आसीत्। अनन्तरं बहूनि अपथानि प्राप्तानि। कस्यां दिशि गन्तव्यमिति न ज्ञायते स्म। अन्ते कमपि एकं मार्गं गृह्णन्ति स्म। कतिपयदिनानां प्रयाणमेव अभवत्। अन्ते एकस्मिन् उष्णजलस्रोतसि प्राप्ते सति पृथ्वीधरः अवदत् : 'ओ, इदं गौरीकुण्डम्। तोटकवर्य, आवाभ्याम् अधुना किं कर्तव्यम्? कस्यां दिशि गच्छाव? भवान् वदतु।'

'आचार्य, दृढेन मनसा केदारस्य दिशि गच्छाव। तत्र कुत्रापि गुरूणां दर्शनं न भवति चेत् अहं तु न जीवामि। तत्रैव कस्माच्चित् शिखरात् पतित्वा देहत्यागं करोमि।'

'तोटकवर्य, तथा न वक्तव्यम्। भगवान् भवतः कृते एकं दायित्वं दत्तवान् इति स्मरतु।'

तोटकः हिक्कासहितं रोदनमकरोत्। स्वल्पसमयानन्तरं समाधानं कृत्वा उभावपि केदारनाथदिशि पुनः प्रयाणम् आरब्धवन्तौ। मार्गे एकः धेनूः पालयन् स्थितः आसीत्। तम् अपृच्छताम् : 'अत्र गच्छन्तं कमपि संन्यासिनं दृष्टवान् वा?'

'ह्यः रात्रौ एकः अस्माकं ग्रामे शयनं कृत्वा अद्य प्रातः उत्थाय गतवान्।'

'सः कथमासीत्, वदतु?'

'प्रायः त्रिंशद्वर्षदेशीयः। कथमासीत् इत्युक्ते किं वदामि, देवः इव आसीत्।'



'हस्ते दण्डं कमण्डलुं च धृतवान् आसीत् वा?'

'अये!.... तर्हि अन्यः कश्चित्, तत्किमपि नासीत्।'

'उन्नतः आसीत्, उत वामनः?'

'नाधिकम्, किन्तु किञ्चिदुन्नतः एव आसीत्।'

'धवलवर्णीयः, उत कृष्णवर्णीयः?'

'शिवः इव धवलः आसीत्।'

'तोटकवर्य, शीघ्रं गच्छाव, आगच्छतु। अस्य वर्णनं श्रूयते चेत्, गुरवः एव इति भासते। दर्शनं भवति चेत् आवयोः भाग्यम्।'

'दण्डः, कमण्डलुश्च नासीदिति उक्तवान् खलु?'

'कुत्रचित् विसर्जनं कृतं स्यात्। आगतं कार्यं समापितवतः परमेश्वरस्य दण्डः, कमण्डलुश्च किमर्थं तोटकवर्य! आगच्छतु गच्छाव।'

केदारेश्वरस्य मन्दिरस्य मार्गेण एव प्रस्थितवन्तौ। सायङ्कालः सन्निहितः। अन्ते बहुदूरे पर्वतारोहणं कुर्वतः कस्यचित् गमनं दृष्टम्। इतोऽपि शीघ्रं चलित्वा गतवन्तौ। वप्रः अत्यन्तं कष्टकरः। निर्निमेषतया दृष्टे सति, पश्चिमस्याम् अस्तं गच्छन्तं सूर्यं आवृतवान् मेघः अपसृतः इत्यतः सूर्यप्रकाशः तस्य जनस्य उपरि अपतत्। गुरवः एव इति स्पष्टमभवत्। उच्चैः आहूतेऽपि ते श्रोतुं न प्रभवन्ति, तावद्दूरम्। अतः तौ भूताविष्टौ इव धावितवन्तौ। अन्तरं न्यूनमभवत्। 'गुरुवर्य, भगवन्, स्वामिन्' इति कण्ठः भिद्येत यथा तथा आहूतवन्तौ। प्रायशः तैः न श्रुतम्। किन्तु अकस्मादेव गुरवः एकपदीं त्यक्त्वा, एकं शिखरम् आरूढवन्तः। उभावपि आयासेन ऊर्ध्वं श्वसन्तौ धावितवन्तौ। अन्तरम् इतोऽपि न्यूनमभवत्। 'भगवन्, भगवन्, भगवन्' इति आहूतवन्तौ। शङ्करः शिखराग्रं प्राप्तः। अस्तं गच्छतः सूर्यस्य प्रकाशः तस्य उपरि अपतत्। सः परावृत्य, अपश्यत्। उभयोरपि गुरूणां स्पष्टं दर्शनमभवत्। अग्रे एकं पदमपि स्थापयितुम् असमर्थौ 'भगवन्, भगवन्' इति अधः अपतताम्। पतनानन्तरं हस्तपादं प्रसारितं यत् स एव नमस्कारः अभवत्। साहसं कृत्वा उत्थितवन्तौ। भगवान् विस्तृततया दक्षिणकरम् उन्नमय्य, करतलं पुरतः पृष्ठतः च कृत्वा आशीर्वादम् अकरोत्। सूर्यः अस्तङ्गतः। पर्वतप्रदेशः इति कारणेन पश्चिमस्याः एकः शिखरः सूर्यं पूर्णतया आवृतवान्। कतिपयक्षणेषु अन्धकारः आवृतः। कोटिशः सौदामन्यः समकालं शङ्करं परितः प्राकाशन्त। उभयोरपि नयने निमीलिते। प्रयत्नेन नेत्रे उन्मील्य दृष्टे सति केवलं प्रकाशः आसीत्, शङ्करस्य शरीरं नासीत्। सः प्रकाशः

न अक्षिणोत् एव। अधुनापि तथैव अस्ति। गुरूणां शरीरं शिखरस्य अपरस्मिन् पार्श्वे गत्वा अन्यत्र कुत्रापि गतं वा, शरीरं देवताः स्वलोकं प्रति नीतवत्यः वा इति न केनापि ज्ञायते। तस्मिन् दिने रक्ताक्षिसंवत्सरस्य ज्येष्ठशुद्धद्वादशीतिथिः।

## १७. शङ्करसन्देशः

शङ्करस्य अन्तिमदर्शनानन्तरं प्रवृत्तायां कुम्भमेलायां पूर्वतनसंवत्सराणाम् अपेक्षया अत्यधिकसङ्ख्यया संन्यासिनां भागग्रहणे पृथ्वीधरस्य योगदानमासीत्। पद्मपादाचार्याः, हस्तामलकाचार्याः, तोटकाचार्याश्च भागमगृह्णन्। वार्धक्यकारणेन सुरेश्वराचार्याः आगन्तुं न शक्ताः। शङ्करस्य सन्देशस्य संन्यासिभ्यः प्रापणविचारे एतेषु चतुर्षु विस्तृतं समालोचनं प्रवृत्तम्। अन्ते तत् दायित्वं पृथ्वीधराय दत्तम्। परेद्यवि संन्यासिनां सभा। सभायाः उद्देशः पूर्वमेव सूचितः इत्यनेन संन्यासिनः उत्साहेन कुतूहलेन च पूर्णाः आसन्। आदौ 'ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता..' इति सर्वैः एककण्ठेन उक्ता आनन्दवल्ली सर्वेषाम् अभूतपूर्वम् आनन्दम् अजनयत्। अनन्तरं पृथ्वीधराचार्यः उत्थाय अवदत् :

'सर्वप्रथमं सर्वज्ञान् परमेश्वरान्, अस्माकं सर्वेषां हृदयसम्राजः शङ्करभगवत्पादान् स्मृत्वा नमस्करोमि। शिबिकायाम् आसीनान्, तैरेव जगद्गुरुत्वेन नियुक्तान् परमपूज्यान् पद्मपादान्, हस्तामलकान्, तोटकान् च नमस्करोमि। वार्धक्यकारणेन अत्रागन्तुम् अशक्तवतः परपूजनीयान् सुरेश्वरान् नमस्करोमि। ब्रह्मविद्वद्वरेण्येभ्यः भवद्भ्यः सर्वेभ्यः अपि मम नमस्काराः। भवतां सर्वेषामपि, शङ्करभगवत्पादानाम् अन्तिमदिनानां विषये श्रोतुम् अदम्यः उत्साहः अस्तीति अहं जाने। अतः आदौ तस्य कथनं मम कर्तव्यम्' इत्युक्त्वा विस्तृततया तत् प्रोक्तवान्। तदवसरे पुनःपुनः तस्य कण्ठः गद्गदितः भवति स्म। कथनस्य आदितः अन्तं यावत् वक्तुः श्रोतॄणां च धाराकाररूपेण नेत्राम्बुप्रवाहः अभवत्। पृथ्वीधरः मनः नियन्त्र्य पुनः आरभत :

'इतःपरं तेषां सन्देशः प्रापणीयः। बदरीनाथगुहायां तेभ्यः दर्शनं दत्तवतां त्रिकालज्ञानिनां व्यासानां कथनानुसारं प्रायः इतःपरं चत्वारि देववर्षाणि यावत् भरतभूमौ परिस्थितिः घोरा भवति। धर्मग्लानिः तीव्रतया भवति। अस्य मूलकारणं बुद्धः। साक्षात् तेनैव उक्तः सिद्धान्तः कः इति निर्णेतुम् आधाराः न सन्ति। सः एव



स्वस्य काले एव बौद्धमतं स्थापितवान् वा, न वा इति स्पष्टं नास्ति। तस्य सिद्धान्तमेव वदन्तः स्मः इति वक्तृषु तस्य अनुयायिषु नैके समूहाः सन्ति। ते सर्वेऽपि स्वस्वग्रन्थान् रचितवन्तः। तेषां सर्वेषां खण्डनं भाष्यकारैः कृतमिति भवन्तः जानन्त्येव, किन्तु एतावत् तु निस्सन्दिग्धम्; अस्य राष्ट्रस्य श्वासं वेदं, वर्णाश्रमधर्मान् च बुद्धः धिक्कृतवान्। शस्त्रास्त्राणाम् उत्पादनम्, मांसस्य विक्रयणं च स्थगितं स्यादिति उपदिष्टवान्।[१] वेदविरुद्धस्य स्वस्य धर्मस्य प्रचाराय सङ्घं स्थापितवान्। कालक्रमेण बुद्धं शरणं गच्छामि, धम्मं शरणं गच्छामि, सङ्घं शरणं गच्छामि इति घोषणद्वारा बुद्धः, सङ्घः, धर्मश्च तस्य अनुयायिनां शरण्याः अभवन्। अनुयायिराजाः सङ्घस्य कृते सहकारं दद्युः इति बुद्धः नियमम् अकरोत्।[२] एतेन बौद्धराजानां, बलात्कारेण बौद्धधर्मं प्रजानाम् उपरि आरोपयितुम् अवसरः प्राप्तः। पशुबलिः स्थगिता।[3] व्याघ्रसिंहसदृशानां दुष्टमृगाणामपि वधः न करणीयः इत्यभवत्। तेन धेन्वाद्याः अपारसङ्ख्यया नष्टाः।[4] मृगयायाः निषेधः कृतः।[5] 'सर्वेषु धर्मेषु सहना भवतु, श्रमणाः ब्राह्मणाः च समभावेन द्रष्टव्याः'[6] इति शिलाशासनेषु लेखनं बौद्धानाम् एकं मुखम्, आक्रमणकारेभ्यः सर्वेभ्यः शत्रुभ्यः अपि साहाय्यमाचरन्तः वैदिकधर्मस्य नाशाय प्रयतनम् तेषाम् अपरं मुखम्। युवकयुवतयः बौद्धविहारेषु मिलित्वा भ्रष्टजीवनं कुर्वन्तः बौद्धधर्मप्रचारकरूपेण स्थितवन्तः इतीदं पितॄणाम् असह्यस्य दुःखस्य हेतुरभवत्। चाणक्यः तत् नियन्त्रयितुं कतिपयनियमान् अकरोत्; बालिकाः पित्रोः अनुज्ञां विना भिक्षुण्यः न भवेयुः। भार्यापत्यानां जीवनस्य व्यवस्थाम् अकृत्वा पुरुषाः भिक्षवः न भवेयुः इत्यादयः।[7] तान् सर्वान् नियमान् धूलिसात् कृत्वा, अशोकः भिक्षुभिक्षुणीनां कृते सर्वकारपक्षतः भोगं कल्पितवान्।[8] एतस्य सर्वस्य परिणामेन बौद्धाः निर्लज्जं तेषां राष्ट्रद्रोहकार्यम् अनुवर्तितवन्तः।

---

१. संघरक्षितः Survey of Buddhism
२. दीघनिकाय १७, महासुदस्ससुत्तान्त
3. First Rock Edict : Romilla Thapar: Ashoka and the Decline of the Mauryas, London (1960) – p. 150
4. K.A. Nilakantha Sastry : The age of Nandas and Mauryas – p. 239
5. Vincent Smith : Early History of India – p. 117, 185
6. Pillar Edict of Ashoka
7. Mukherji : Chandragupta and his time (1957) – p. 296
8. H.G.Wells : New and Revised Outline of History (1931) – p. 404

MahaParivrajaka

एतत् कालक्रमेण जातं तेषां पतनं न। आरम्भतः अपि ते राष्ट्रद्रोहिणः एव सन्ति। १०००वर्षेभ्यः प्रागेव भरतभूमिम् आक्रान्तवते अलेक्साण्डराय ते स्वागतम् अकुर्वन्।[9] ब्राह्मणानां नेतृत्वे एकस्य पत्तनस्य प्रजाः विद्रोहं कृत्वा तान् सम्मुखीकृतवत्यः। केनापि प्रकारेण तेषां ब्राह्मणानाम् उपशमनं कृत्वा प्रतिनिवर्तयितुम् अलेक्साण्डरेण शक्यं नाभवत्। तदा सः सैन्यबलेन दुर्गं स्वाधीनं कृत्वा, अनन्तरं तेषां निरायुधब्राह्मणानां मारणं कारितवान्। आहत्य ८०,००० जनाः तेन द्वारा हताः। इतोऽपि बहूनां जनानां बन्धनं कृत्वा दास्यार्थं विक्रयणम् अकरोत्।[10] ग्रीकाणाम् अनन्तरं देशम् आक्रान्तवद्भ्यः कुशानेभ्यः अपि बौद्धाः साहाय्यम् अकुर्वन्।[11] अधुना ९०वर्षेभ्यः पूर्वं सिन्धुदेशम् आक्रान्तवद्भ्यः यवनेभ्यः साहाय्यं कृत्वा आचरितः द्रोहस्तु अत्यन्तं घोरः। तेषां द्रोहेण यवनाः राजानं दाहिरं मारयित्वा, तस्य द्वे राजकुमार्यौ सहस्रशः इतरस्त्रियः च स्वीकृत्य गतवन्तः। पत्तनानि अग्निना दग्धवन्तः। क्रौर्येण अस्मदीयान् स्वधर्मं प्रति परिवर्तितवन्तः। अन्ते स्वेषां कृते साहाय्यम् आचरितवतः बौद्धानपि मारितवन्तः।[12] एतावत्सर्वं जातं चेदपि अस्मदीयानाम् एव बौद्धानां बुद्धिः न जागरिता खलु! यवनानाम् अपि बौद्धमतम् इव व्यक्तिनिष्ठमतम् इति स्मरन्तु।'

'अन्यैः क्रियमाणं मतपरिवर्तनम् अपि वदामि, शृण्वन्तु। भगवता शङ्करेण यत्र जनिः प्राप्ता तस्मिन् केरलदेशे पश्चिमस्याः आगताः क्रैस्तनामकाः जनाः सन्ति। तत्र आगत्य उषितवतां तेषां प्रायः ७ शताब्द्यः अभवन्। ते मुग्धान् अस्मदीयान् जनान् वञ्चनया स्वमतं प्रति परिवर्त्य, तेभ्यः अधुनापि धनं संगृह्णन्तः सन्ति।[13] क्रैस्तानामपि व्यक्तिनिष्ठमतमेव।'

---

9. W.W.Tam : Greeks in Bactria – p. 175; Nehru : Discovery of India – p. 43; Vincent Smith : Early History of India – p. 299
10. W.W.Tam : Alexander the Great, Vol.II (1950) – p. 53
11. Majumdar, Roy Choudhary, Kali Kumaradatta : Advanced History of India (1950) – p.122
12. Majumdar : Arab Invasion of India – p. 26; AlBiladuri : Ellict History of India Vol. I p. 122; Chachanama : Ellict History of India Vol. I p. 161
13. R.G.Pothan : Syriyan Christians of Kerala (1963) – p. 22, 32-33; J.H.Lord : The Jews in India and the Far East (1907) – p.62-63; Francis day : The Land of the Perumals (1863) – p.234; K.A.Nilakantha Sastry : History of South India (1958) – p.429



MahaParivrajaka

'अस्य कः अर्थः? कश्चित् व्यक्तिनिष्ठावैदिकमतं प्रति परिवृत्ताः सर्वेऽपि वैदिकधर्मस्य, अस्य देशस्य च कृते द्रोहकरणपर्यन्तं गच्छन्ति इत्यभवत्। अयं द्रोहरूपः व्याधिः देशस्य अञ्चलभागेभ्यः आरब्धः। पुष्यमित्रादयः राजानः इमां समस्यां प्रायः राजनैतिकव्यवहारेण परिहृतवन्तः इति सत्यम्; बौद्धमतप्रचारः प्रायशः शान्तः जातः अस्ति। एतत् दृष्ट्वा वयम् आत्मानं विस्मृत्य उपविशामश्चेत् दोषाय। यतो हि यावत्पर्यन्तं जनानां वैदिकधर्मविचारे ईषदपि ज्ञानं न भवति तावत्पर्यन्तम् अयं व्याधिः न नश्यति; क्रौर्येण वञ्चनया वा तान् सुखेन शत्रवः आकर्षन्तः गच्छेयुः। अतः अस्याः समस्यायाः सामाजिकरूपेण परिहारः अन्वेष्टव्यः।'

'स्वाध्यायप्रवचने एव शङ्करेण सूचितः अयं परिहारः। सर्वदा सर्वत्र सञ्चारं कृत्वा, सर्वाभिः प्रजाभिः सह सुहृद्भावेन सम्मिल्य धर्मस्य बोधनं, धर्माचरणकारणं च अस्माकं कर्तव्यम्। गृहस्थविद्वांसः अपि एतत् कार्यं कुर्वन्ति। किन्तु तेषां, संन्यासिनाम् अस्माकं च बहुभेदाः सन्ति। गृहस्थाः एतदर्थं स्वेषां सम्पूर्णसमयं दातुं न शक्नुवन्ति; समग्रसमाजस्य स्थितिम् अवगन्तुं तेषाम् अवसराः न सन्ति, यतो हि तेषां सञ्चारः न्यूनः; त्यागः अभयं च तेषां सम्पूर्णतया साध्यं नास्ति। एताः अननुकूलताः अस्माकं न सन्ति। वयम् आदिनं एतत् कार्यं कर्तुं शक्नुमः; ग्रामे ग्रामे सञ्चरणेन अस्माकं कृते सर्वेषां जनानां सम्पर्कः भवति; वयं सर्वान् व्यामोहान् त्यक्तवन्तः इत्यनेन भयम् अस्माकं समीपमपि नागच्छति। एतत्कथनावसरे अलेक्साण्डरेण सम्मुखीकृतः एकः प्रसङ्गः मम स्मृतिपथे आयाति। वदामि, शृण्वन्तु।'

'तक्षशिलायां वृद्धस्य, ज्ञानिनः, कौपीनमात्रधारिणः च एकस्य दण्डिसंन्यासिनः विचारे अलेक्साण्डरः श्रुतवान् आसीत्। स्वस्य दूतद्वारा तस्मै संन्यासिने किञ्चित् स्वर्णेन सह एकं सन्देशं प्रेषितवान् : अलेक्साण्डरः सूर्यपुत्रः। सम्पूर्णविश्वमेव जितवानस्ति। सः भवते एतानि स्वर्णाभरणानि प्रेषितवानस्ति। इतःपरं भवान् सुखेन जीवितुं शक्नोति; भिक्षायाचनस्य आवश्यकता नास्ति। एतत् स्वीकृत्य आस्थानम् आगत्य तेन मिलतु। एतद् नाङ्गीकरोति चेत् सः भवतः शिरश्छेदनं करोति!' अमुं सन्देशं श्रुत्वा सः दण्डिसंन्यासी हसित्वा दूतं प्रति अवदत् :

'भोः, भवतः राज्ञे मया अधुना वक्ष्यमाणानि वचनानि सूचयतु। सूर्यपुत्रः सः एकः एव न, अहमपि सूर्यपुत्रः एव, सर्वे मानवाः अपि सूर्यपुत्राः एव। सः विश्वविजेता इति उक्तवान् खलु? सः इतोऽपि व्यासनदीमपि[१४] न तीर्णवान्। तस्याः अनन्तरं

---

१४. बियास्नदी

विद्यमानः प्रदेशः दुर्गमः। ततोऽपि अनन्तरं विद्यमानं मगधम्। अमुम् अतिदुर्गमप्रदेशं तीर्त्वा, मगधमपि आक्रम्य, सः जीवन् विद्येत चेत् तदा सः विश्वविजेता भवितुमर्हति। अपि च तेन प्रेषितं स्वर्णमस्ति खलु, तस्य उपरि अहं निष्ठीवनं करोमि। तेन मम न किमपि प्रयोजनम्। इयं मातृभूमिः मह्यं सर्वं दत्तवती। अपि च शिरश्छेदनरूपं भयम् उत्पादितवान् खलु, शिरश्छेदनेन किं भवेत्? अधः पतितं शिरः, यस्याः मृदः आगतं तस्यामेव सम्मिलेत्। आत्मा मरणं न प्राप्नोति। सः आत्मा अहम् अच्छेद्यः, अदाह्यः, सनातनश्च। एतानि भयोत्पादकवचनानि स्वर्णमोहिषु भयम् उत्पादयेयुः, मयि न। मम स्वर्णव्यामोहः अपि नास्ति, मरणभीतिरपि नास्ति। तस्य आस्थानं प्रति नागमिष्यामि। गच्छतु तावत्।' केवलम् एकेन कौपीनधारिणा एवं तुच्छरूपेण तिरस्कृतः भवेयम् इति अलेक्साण्डरः स्वप्ने अपि न कल्पितवान् आसीत्।'[15]

अतः परिस्थितेः प्रगत्यर्थम् अधुना अस्माभिः किं करणीयम् इत्यस्य शङ्करेण दत्तानां सूचनानां कथनमेव अवशिष्टमस्ति। अयं भारतीयवैदिकसमाजपुरुषः अव्यक्त-भगवतः व्यक्तरूपम्। अयमेव वेदपुरुषः। ब्राह्मणक्षत्रियवैश्यशूद्राः चत्वारः अपि वैदिकसम्प्रदाये अन्तर्गताः; इत्युक्ते, एते चत्वारः अपि भगवतः अङ्गानि। अस्य भगवतः, ये म्लेच्छाः अथवा अस्मदीयाः भङ्गं कर्तुम् इच्छन्ति, तेषां प्रयत्नानां निष्फलीकरणम् अस्माभिः क्रियमाणा भगवतः सेवा। इदम् अस्माकं कर्तव्यम्। संन्यासिनः अस्मान् समाजः अन्नवस्त्रवास्तव्यानि दत्त्वा पोषयति। अतः वयं समाजस्य अधमर्णाः। शान्तिसमये चेत् तेभ्यः वेदान्तम् उक्त्वा अस्मात् ऋणात् मुक्ताः भवेम। क्षोभसमये अस्य अवसरः नास्ति। अधुना वयं क्षोभसमये स्मः। अधुना करणीयं धर्मरक्षणम्। देशस्य उपरि शत्रुराजाः सैन्यसमेतम् आगत्य आक्रमणं कुर्वन्ति चेत् वयं राजभ्यः मार्गदर्शनं कृत्वा परोक्षतया समाजस्य ऋणात् मुक्ताः भवितुं शक्नुमः; एतदतिरिच्य वयमेव किमपि कर्तुं न शक्नुमः। किन्तु धर्माचरणार्थं जनेषु उत्साहजननकार्यं यदा कदापि कर्तुं शक्यते; अधुना तु तदेव करणीयम्। एतत्करणावसरे समग्रसमाजः अस्माकं दृष्टौ स्यात्; न कोऽपि त्यक्तव्यः। समाजे विविधसंस्कारवन्तः भवन्ति। विष्णुभक्ताः, शिवभक्ताः इत्यादयः। तेषु कस्यापि श्रद्धा न न्यूनीकर्तव्या; वर्धनीया। किन्तु तेषु परस्परम् असहना यथा न स्यात् तथा, विष्णुशिवादयः सर्वेऽपि एकस्यैव परमात्मनः विविधरूपाणि इत्यत्र 'सब्रह्म सशिवस्सहरिस्सेन्द्रस्सोऽक्षरः परमस्वराट्' इति वेदवाक्यम् उक्त्वा, तस्य वेदः एव प्रमाणम् इति सर्वदा बोधनीयम्। अतः एव

15. M'Crindle : Megasthenes – p.124-126



शङ्करभगवत्पादाः प्रधानतया देशस्य विविधेषु भागेषु पूज्यमानान् विष्णुसूर्यशक्तिशिव-गणपतिकुमारान् तेषां तेषां सम्प्रदायानुसारं पूजयितुम् उक्त्वा, षण्मतस्थापनाचार्याः अभवन्। एते सर्वेऽपि एकः एव परमात्मा इति अवबोधयितुं पञ्चायतनपूजाक्रमं व्यवहारपथे आनीतवन्तः। अयं शङ्करसन्देशः भरतवर्षस्य प्रत्येकं जनमपि प्राप्येत।'

'इतःपरम् अस्य सन्देशस्य प्रापणकार्ये अवधेयान् अंशान् वदिष्यामि। जनाः विविधसंस्कारवन्तः भवन्ति। अयं संस्कारः गतजन्मनां कर्म, प्रकृतजन्मनः परिवेषं च अवलम्बते। अतः, प्रापणीयः सन्देशः एकः एव चेदपि, बोधनक्रमः संस्कारमनुसृत्य भिन्नः भवति। भगवतः शङ्करस्य उपदेशशैलीं वयं दृष्टवन्तः। सः ब्राह्मणविद्वद्भिः सह गभीरान् शास्त्रविचारान् चर्चयति स्म। मुग्धेभ्यः तमेव विचारं पुराणेतिहासानां द्वारा बोधयति स्म। अस्माभिरपि सः एव क्रमः अनुसर्तव्यः। पुनश्च श्रोतृषु इव वक्तृषु अपि संस्कारसामर्थ्यानि विभिन्नानि भवन्ति। अतः अस्माभिः अस्माकं संस्काराणाम् अनुसारम् अरण्येषु, पर्वतप्रदेशेषु, नदीतीरेषु, समुद्रतीरेषु, ग्रामेषु, नगरेषु च सञ्चारं कुर्वद्भिः, जनेभ्यः धर्मस्वरूपं बोधयद्भिः, समग्रराष्ट्रं वैदिकपरम्परायां यथा दृढतया तिष्ठेत् तथा करणीयम्। एतदर्थम् इतः परम् ऋग्वेदगोवर्धनपीठस्य जगन्नाथपुर्याः परमपूज्यानां हस्तामलकाचार्याणां शिष्यपरम्परायां संन्यासिनां वनम्, अरण्यम् इति उपनामनी भवतः। यजुर्वेदशारदापीठस्य शृङ्गेर्याः सुरेश्वराचार्याणां शिष्यपरम्परायां सरस्वती, भारती, पुरी इति उपनामानि भवन्ति। सामवेदकालिकापीठस्य द्वारकायाः पद्मपादाचार्याणां शिष्यपरम्परायां तीर्थम्, आश्रमः इति उपनामनी, अथर्ववेद-ज्योतिःपीठस्य बदरीनाथस्य तोटकाचार्याणां शिष्यपरम्परायां गिरिः, पर्वतः, सागरः इति च उपनामानि भवन्ति। अस्माभिः सर्वैरपि, इतःपूर्वमेव सूचितेषु भारतस्य विविधेषु प्रदेशेषु विकीर्य इदम् ईश्वरीयकार्यं निर्वोढव्यम्। सततसञ्चारः, प्रवचनं च अस्माकं स्वभावः भवेत्। अस्माभिः सर्वैरपि काङ्क्षमाणायाः आत्मज्ञानप्राप्तेः एतदपेक्षया महत्तपः अन्यत् नास्ति। अपि च भवत्सु ये आत्मज्ञानिनः ते अपि इदं कार्यं कुर्युः इत्यस्य शङ्करः एव आदर्शः खलु। एवम् अस्माकं सर्वेषां कृते भगवान् शङ्करः एव आदर्शः। तैः दर्शिते मार्गे एव जीवामः। ते अविश्रान्ततया यथा सञ्चारं कृतवन्तः तथा वयमपि सञ्चारं कुर्वन्तः भवामः। अस्माभिः करणीयस्य अस्य कार्यस्य कृते भगवतः शङ्करस्य मार्गदर्शनमपि अस्ति, अनुग्रहश्च अस्ति। इतःपरं का अस्माकं चिन्ता! सत्यमेव जयते!' इति स्वस्य भाषणं समापितवान्।

उपस्थितं संन्यासिवृन्दम् 'आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् अस्मिन् राष्ट्रे

राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढानड्वा नाशुस्सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठास्सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्' इति शान्तिमन्त्रम् एककण्ठेन अवदत्।

सभा समाप्ता, कार्यम् आरब्धम्। सभा विकीर्णा, समाजः सम्मिलितः। सः खण्डशः भवतीति प्रतीक्षां कुर्वताम् आशाभङ्गः अभवत्। किन्तु अस्य फलस्य, शङ्करात् १२शताब्दीभ्यः पूर्वम्, अनन्तरं १२शताब्दीनां च अगणितसज्जनानां अविश्रान्तः श्रमः, असीमः त्यागः च आवश्यकः अभवत्। अन्ते दास्यविमोचनम् अभवत्। अग्रे समाजस्य सर्वाङ्गीणाभ्युत्थानाय अवशिष्टः एकः एव अंशः; अधुना समाजस्य सर्वेषु क्षेत्रेषु अग्रगामित्वेन ये अविवेकिनः सन्ति तान् पार्श्वे कृत्वा, विवेकिभिः अग्रगामित्वस्य निर्वहणम्। इदं कार्यम् ईषत् मन्दं स्यात्। किन्तु भवतीत्यत्र नास्ति सन्देहः।

।। इति शम् ।।

**।। शम्भुश्चरति भुवने शङ्कराचार्यरूपः ।।**



## परिशिष्टम् १

## ।। गोविन्दाष्टकम् ।।

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं
गोष्ठप्राङ्गणरिङ्गणलोलमनायासं परमायासम्।
मायाकल्पितनानाकारमनाकारं भुवनाकारं
क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम्।।

मृत्स्नामत्सीहेति यशोदाताडनशैशवसन्त्रासं
व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम्।
लोकत्रयपुरमूलस्तम्भं लोकालोकमनालोकं
लोकेशं परमेशं प्रणमत गोविन्दं परमानन्दम्।।

त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नं
कैवल्यं नवनीताहारमनाहारं भुवनाहारम्।
वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासं
शैवं केवलशान्तं प्रणमत गोविन्दं परमानन्दम्।।

गोपालं प्रभुलीलाविग्रहगोपालं कुलगोपालं
गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम्।
गोभिर्निगदितगोविन्दस्फुटनामानं बहुनामानं
गोधीगोचरदूरं प्रणमत गोविन्दं परमानन्दम्।।

गोपीमण्डलगोष्ठीभेदं भेदावस्थमभेदाभं
शश्वद्गोखुरनिर्धूतोद्गतधूलीधूसरसौभाग्यम्।
श्रद्धाभक्तिगृहीतानन्दमचिन्त्यं चिन्तितसद्भावं
चिन्तामणिमहिमानं प्रणमत गोविन्दं परमानन्दम्।।

स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढं
व्यादित्सन्तीरथ दिग्वस्त्रा दातुमुपाकर्षन्तं ताः।
निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरन्तःस्थं
सत्तामात्रशरीरं प्रणमत गोविन्दं परमानन्दम्।।

कान्तं कारणकारणमादिमनादिं कालघनाभासं
कालिन्दीगतकालियशिरसि सुनृत्यन्तं मुहुरत्यन्तम्।
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नं
कालत्रयगतिहेतुं प्रणमत गोविन्दं परमानन्दम्।।

वृन्दावनभुवि बृन्दारकगणबृन्दाराधितवन्द्यायां
कुन्दाभामलमन्दस्मेरसुधानन्दं सुमहानन्दम्।
वन्द्याशेषमहामुनिमानसवन्द्यानन्दपदद्वन्द्वं
नन्द्याशेषगुणाब्धिं प्रणमत गोविन्दं परमानन्दम्।।

गोविन्दाष्टकमेतदधीते गोविन्दार्पितचेता यो
गोविन्दाच्युत माधव विष्णो गोकुलनायक कृष्णेति।
गोविन्दाङ्घ्रिसरोजध्यानसुधाजलधौतसमस्ताघो
गोविन्दं परमानन्दामृतमन्तःस्थं स तमभ्येति।।

* * *

## परिशिष्टम् २

## ।। मातृपञ्चकम् ।।

आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा
नैरुच्यं तनुशोषणं मलमयी शय्या च सांवत्सरी।
एकस्यापि न गर्भभारभरणक्लेशस्य यस्याक्षमो
दातुं निष्कृतिमुन्नतोऽपि तनयस्तस्यै जनन्यै नमः।।

गुरुकुलमुपसृत्य स्वप्नकाले तु दृष्ट्वा
यतिसमुचितवेषं प्रारुदो मां त्वमुच्चैः।
गुरुकुलमथ सर्वं प्रारुदत्ते समक्षं
सपदि चरणयोस्ते मातरस्तु प्रणामः।।

न दत्तं मातस्ते मरणसमये तोयमपि वा
स्वधा वा नो देया मरणदिवसे श्राद्धविधिना।
न जप्तो मातस्ते मरणसमये तारकमनुः
अकाले सम्प्राप्ते मयि कुरु दयां मातरतुलाम्।।



मुक्तामणिस्त्वं नयनं ममेति
राजेति जीवेति चिरं सुत त्वम्।
इत्युक्तवत्यास्तव वाचि मातः
ददाम्यहं तण्डुलमेव शुष्कम्।।

अम्बेति तातेति शिवेति तस्मिन्
प्रसूतिकाले यदवोच उच्चैः।
कृष्णेति गोविन्द हरे मुकुन्दे-
त्यहो जनन्यै रचितोऽयमञ्जलिः।।

* * *

Maha Parivrajaka